सं.२१०
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
8.1
779

शृङ्गारसारिणी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राप्ति-संख्या 608

न्थ-कार्ड
[० जैन (शोध) संस्थान
न्थागार
, वाराणसी-५
araśarini of
dhara of mithila.

	लेनेवालेका हस्ताक्षर	लौटानेकी तिथि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



With best compliments

Presented to Dr G. C. Chowdhary

T. Jha
29.7.'65

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

THE ŚṚṄGĀRASĀRIṆĪ

OF

MM. CITRADHARA OF MITHILĀ

[Published with the financial assistance from the Ministry of Education, Govt. of India]

CRITICALLY EDITED BY

DR TRILOKANĀTHA JHĀ
M. A., PH. D.,

Department of Sanskrit,
Chandradhari Mithila College, Darbhanga

DARBHANGA
1965

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Published by:

Dr Trilokanātha Jhā,
M. A., Ph. D.,

Department of Sanskrit,
C. M. College,
Darbhanga (BIHAR)

Copyright reserved

Price: Rs. Four Only

Printed by:

Tara Printing Works, Varan as

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शृङ्गारसारिणी

(मैथिलमहामहोपाध्यायचित्रधरविरचिता)

दरभङ्गास्थचन्द्रधारिमिथिलामहाविद्यालयस्य संस्कृतविभागीयाध्यापकेन
झोपाह्व-(डाक्टर)-त्रिलोकनाथशर्मणा
सम्पादिता

१९६५ तमे खृष्टाब्दे दरभङ्गानगर्यां केन्द्रीयशिक्षामन्त्रालयद्रव्यसाहाय्येन
प्रकाशिता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशकः —

डाक्टर त्रिलोकनाथझा, एम्. ए., पी-एच्.डो.,
संस्कृतविभागीयाध्यापकः,
चन्द्रधारिमिथिलामहाविद्यालयः,
दरभङ्गा (विहार)

प्रकाशनाधिकारः स्वायत्तीकृतः

मूल्यम् ४) रौप्यकाणि

मुद्रकः —

तारा यन्त्रालयः, वाराणसी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

To
Our respected father
Who is now no more

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

PREFACE

Some years back Śrī Ambikānātha Miśra, B. A. (Hons), Dip.-in-Ed. of village Lālagañja (P. O. Lohana Road, District Darbhanga) was kind enough to hand over a bound copy ($10\frac{1}{2}'' \times 8\frac{3}{4}''$) written in Maithilī characters to us for our perusal and in it we discovered *inter alia* the *Śṛṅgārasāriṇī* and *Vīrataraṅgiṇī* of Mahāmahopādhyāya Citradhara. Notices of these two works had been made earlier by Jayaswal[1], Singh[2] and Miśra[3] but the last two of them, probably misled by analogy, wrongly named the *Vīrataraṅgiṇī* also as *Vīrasāriṇī*. An examination of the works aroused in us an unstinted praise for their merit which is manifold in character. Apart from their poetic beauty evinced in the illustrative verses and their critical insight shown in the analysis of the views of the preceding theorists of poetry and the author's emendations thereon, these works of Mm. Citradhara also serve as a valuable source of information for the world of literatures. The *Vīrataraṅgiṇī* gives citations from two unknown works of the author, viz., *Vināyakastava* and *Rājastutipadya*. Besides, the *Śṛṅgārasāriṇī* quotes from *Alasamodinī*[4], a hitherto unknown treatise on Sanskrit poetics.

---

1. K. P. Jayaswal in Descriptive Catalogue of Manuscripts in Mithila–Vol.–II–pp. 69-71 (Nos 51, 51A) and p. 65 (No. 46), Patna, 1933
2. S. N. Singh in History of Tirhut–p. 124, The Baptist Mission Press, Calcutta 1922.
3. Umesha Mishra in his introduction (p. 7) to the *Vidyākarasahasraka*, an anthology of Sanskrit verses compiled by Vidyākara Miśra, Allahabad University Publication, Allahabad, 1942.
4. Fortunately the present writer could discover and publish it for the first time. For particulars *vide* his paper entitled "*Alasamodinī* of Gaṅgānanda Kavīndra" published in the Vishweshwaranand Indological Journal, vol. II, pt. II (September 1964).

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

We wanted to publish a critical edition of these two unpublished Sanskrit texts. We collected available manuscripts, collated them and prepared a copy for the press. In the meantime we approached the Ministry of Education, Government of India for financial assistance for the publication and we are grateful to the authorities for complying with our request.

In fine, let us thank the proprietors of the Tara Printing Works, Varanasi, but for whose co-operation the printing would have been much delayed.

TRILOKANĀTHA JHĀ

March 8, 1965.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CONTENTS

Preface	...	...	...	pp. VII-VIII
Introduction	...	...	...	pp. XI-XII
Text	...	...	...	pp. 1-70
An alphabetical index of verses found in the *Śṛṅgārasāriṇī*.		...	...	pp. 71-75
An alphabetical list of books and authors cited or referred to by Citradhara in his *Śṛṅgārasāriṇī*			...	p. 76

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

INTRODUCTION

Mahāmahopādhyāya Citradhara was the eldest son of Mahāmahopādhyāya Vaṁśadhara of the *Dariharā*-family of the brahmins of Mithilā. He was an inhabitant of village Maṅgarauni in the district of Darbhanga. He flourished during the first half of the eighteenth century A.D.. Among his literary works the *Śṛṅgārasāriṇī* and the *Vīrataraṅgiṇī* deserve special mention.[1]

THE ŚṚṄGĀRASĀRIṆĪ

The *Śṛṅgārasāriṇī* is a treatise on Sanskrit poetics dealing with the *Śṛṅgāra-rasa* in all its different phases. The author has discussed in detail the nature of *śṛṅgāra, rati, kāmadaśā, māna, nāyikā*-s, *nāyaka*-s and their accessories. He has given fine verses as illustrations, most of which are his own. But he is not arbitrary in his discussions. He records the views of the preceding theorists of poetry with due acknowledgment and gives his own emendations wherever possible.

MANUSCRIPT MATERIAL

We have consulted the two manuscripts of the *Śṛṅgārasāriṇī* available to us. For future references they have been marked A and B. Their description is as follows—

Ms "A"—A bound copy ($10\frac{1}{2}'' \times 8\frac{3}{4}''$) containing *inter alia* the *Śṛṅgārasāriṇī*, complete in 27 pages, correctly written in Maithilī characters, lines varying from 30 to 40 to a page and letters 38 to 41 to a line, The manuscript bears the signature of the scribe

1. For an exhaustive account of the age, identity and works of Mahāmahopādhyāya Citradhara *vide* our introduction to the *Vīrataraṅgiṇī*, published, Darbhanga, 1965.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

and is dated. It reads—20. 7. 1906 Yadunath Mishra. Besides, we have the colophon which reads as follows—

युगेन्दुरामेन्दुमिते यावने श्रावणे भृगौ ।
दर्शेऽलिखदिदं पुस्तं यदुनाथो महीसुरः ॥

This date San 1314 Fasli also corresponds to the year 1906 A. D. This manuscript is preserved with us.

Ms "B"—A paper manuscript, complete, $10\frac{1}{3}'' \times 3\frac{3}{4}''$, consisting of 25 folios, written in Maithilī characters, full of orthographical mistakes. Folio Nos 9 and 10 missing. Folios wrongly numbered. Folio No. 27 should be treated as No. 25. Because of this wrong numbering folio No. 25 and 26 appear to be missing. Mistake in the numbering of verses as well. This manuscript is deposited in the Kameshwar Singh Darbhanga Sanskrit University Library. It is the second manuscript of the bundle No. 278. The manuscript has lines varying from 9 to 13 to a folio and letters 48 to 50 to a line. The colophon is missing.

We are grateful to the authorities of the Kameshwar Singh Darbhanga Sanskrit University for allowing us to utilise their manuscript for the present edition.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ शृङ्गारसारिणी प्रारभ्यते।

ॐ नमो गिरीन्द्रनन्दिनीपदारविन्दरेणवे।

जगज्जलधितारकः कृतिकुले मुदां धारकः
पराभवविदारकः सुकृतिरीतिसञ्चारकः।
द्विषद्वन[1]कुठारकस्सकलखेदसंहारकः
सदैव सुखकारकः स्फुरतु शूलिनो दारकः ॥१॥

कूले मोदानुकूले दिनकरदुहितुर्म्मोदयन् मानवीयं
चेतश्चामीकरा[भच्छ]वि[2]नवलतया[3]ऽऽलिङ्गितो लीलयैव।
छायाभिर्न्नीयमानः परमरुचिरतां चीयमानः फलौघै-
स्तीव्रं तापं तनोर्न्नस्तिरयतु ललितः कोपि[4]वृक्षस्तमालः ॥२॥

शृङ्गारैकरसप्रसाररुचिरा चेतश्चमत्कारिणी
सल्लीलाललिता विलासवलिता भूयः श्रमोत्सारिणी।
यत्नाच्चित्रधरेण चारु रचिता तापावलीदारिणी[5]
सद्यस्सम्मद[6]कारिणी सुकृतिनां भूयादसौ सारिणी ॥३॥

रसं समर्प्पयत्येषा तापमुत्सारयत्यपि।
शृङ्गारसारिणीमेनामतः शीलयतात्सुधीः ॥४॥

सदेक[7]मलयाचलः स्फुरति कोऽपि तत्राप्यसौ
द्विजिह्वरभसोज्झितो[8] मतिमयः पटीरद्रुमः।
तदाश्रयपरा मुदं दधति मामकीना गिर-
स्तपत्वथ खलाशयः स्फुरदखण्डचण्डातपः ॥५॥

---

१. B reads द्विषद्दल—
२. B reads कराच्छछवि
३. A reads—मयलतया
४. वृक्ष Missing in B
५. B reads दारुणी
६. B reads सन्मद
७. A reads मदेक
८. B reads रमसोज्झिता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रोद्यत्प्रज्ञपदार्प्पणोपहतयोऽसन्तस्समाः कण्टकै-
र्म्मा भूवन्निह [तो]षगाः सुमनसां सौलभ्यभव्यच्छिदः ।
जीयासुः परमुत्तमोत्तमगुणग्रामग्रहग्राहकाः
कालुष्योद्धरणप्रसारितपटप्रौढाः परे सज्जनाः ॥६॥

लोकोत्तरानन्दमकरन्दरसालेषु रसेषु प्राथम्यात्, विषयिणां प्रचुरप्रयोगप्रापकत्वाच्च श्रृङ्गारो[१] निरूप्यते । तत्र रतिस्थायिको रसः श्रृङ्गारः ।

ननु रतिस्थायिभावक इत्यत्र बहुव्रीहौ रतिः स्थायिभावो यस्येति विग्रहवाक्यं, तत्र च षष्ठ्यर्थो विषयत्वं, रसपदार्थश्च विभावानुभावव्यभिचारिपरामर्षजन्या[२]-भिव्यक्तिः । तथा च विभावानुभावव्यभिचारिण्या रतिस्थायिभावविषयिणी अभिव्यक्तिः श्रृङ्गाररस इति फलितम् ।

एवञ्च "'व्यक्तः[३] स तैर्विभावाद्यैः स्थायिभावो रसः स्मृत'[४]" इति काव्यप्रकाशकारिकाविरोध इति चेत्[५] । सत्यम् । षष्ठ्या घटकत्वार्थकत्वेनाविरोधात् । तथा हि विभावानुभावव्यभिचारिभिर्व्यज्यमाना रतिः श्रृङ्गार इति पर्य्यवसितोऽर्थः । न चैवं विभावादिव्यज्यमाने पुत्राद्यालम्बनरत्यात्मक[६]भावेऽतिव्याप्तिरिति वाच्यम्, यूनोः परस्परं जायमानस्य रतिविशेषस्यैव प्रकृते रतिपदार्थत्वात् । न चैवमपि श्रृङ्गाराभासेऽतिव्याप्तिरितिवाच्यम्, अनौचित्यरहितत्वेनापि [७]रतेर्विशेषणीयत्वात्, आभासे[८] तद्विरहात् ।

---

१. B reads श्रृङ्गाररसो
२. परामर्षजन्या missing in B
३. A reads युक्तः
४. *op. cit*-IV-28cd (p. 86), B. O. R. I., Poona, 1950 edition
५. A reads विरोधश्चेत्
६. B omits—द्यालम्बनरत्यात्म-
७. A omits रतेर्
८. A reads—दाभासे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुक्तम्——'तदाभासा अनौचित्यप्रवर्तिता' इति। अनौचित्यञ्च तिर्यगादिगतत्वम्, अनेका[१]लम्बनकत्वञ्चेत्यादि यथादर्शनमनुसन्धेयम्[२]। नन्वेवं सर्व्वत्र रसे लोकोत्तरानन्दभानव्यवहार आलङ्कारिकाणां कथमुपपद्यत इति चेत्, इत्थमुपपद्यते, अन्वयव्यतिरेकाभ्यां रसोद्बोधस्यानन्दजनकत्वाद्युपगमात्। रसोद्बोधाव्यवहितक्षण एवानन्द उत्पद्यते, ततश्चाव्यवहिते तत्संवेदनम्। क्रमस्य दुर्लक्षतया[३] चानन्दाभिव्यक्तिरसाभिव्यक्त्योर्भेदाग्रहाद् रसाभिव्यक्तावानन्दभानव्यवहारः। तार्किकरीतिरियम्। जगन्नाथपण्डितास्तु——विभावादिपरामर्शनिवर्तितानन्दांशावरणाज्ञानः प्रमाता रत्यादीनिव निजानन्दस्वरूपमपि प्रकाशयति यथा शरावपिहितो दीपस्तन्निवृत्तौ सन्निहितपदार्थानिव स्वात्मानमपि प्रकाशयति[४]। इत्थञ्च सर्व्वत्रैव रसे समुल्लिखितानन्दभानं निष्प्रत्यूहमेव। न चैवं कल्पनं निष्प्रमाणकमिति वाच्यम्, रसेष्वानन्दभानस्य सहृदयहृदयसाक्षिकत्वेनोपपाद्यत्वात्[५]। श्रुतिरप्याह——'रसो वै सः' 'रसं ह्येवायं लब्ध्वानन्दीभवती'ति।

एतेन शृङ्गारादावानन्दभानस्य सम्भवेऽपि करुणबीभत्सयोर्न्न तत्सम्भवः प्रत्युत शोकादितादात्म्यस्य स्वस्मिन्नारोप्यतया दशरथादेरिव स्वस्यापि दुःखभानस्यैवोचितत्वात्, दुःखकार्यस्याश्रुपातादेरनुभूतत्वाच्चेति परास्तम्। यथा दण्डाघातोऽन्यत्र दुःखावहोऽपि सुरते सुखमेवार्प्पयति तथा शोकादिरपि शोके दुःखावहोऽप्यलौकिककाव्यव्यापारारूढोऽलौकिकमेवानन्दमनुभावयतीत्यस्य सहृदयहृदयानुभवेन सुदृढनिरूढत्वात्, रसपदेन सामान्यतो रसेषु सुखसमुन्मेषस्य बोधिकायाः श्रुतेः साधकत्वाच्च। अश्रुपातादयश्चानन्दकार्य्या अपीति न दुःखमनुमा[पयि]तुं क्षमन्ते, अतएव भगवद्भक्तानां भगवत्कथाश्रवणेऽश्रुपातोऽनुभूयते नहि तत्र जात्वपि दुःखलेशोऽस्तीति प्राहुः।

---

१. B reads— मनेका—
२. B reads—मवधेयम्
३. B reads दुर्लक्ष्य—
४. A omits यथा ''प्रकाशयति
५. B reads—स्वेनैवोप—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स चायं श्रृङ्गारो द्विविधः विप्रलम्भः सम्भोगश्च । तत्र अभीष्टानवाप्तौ प्रकृष्टा[१] रतिर्विप्रलम्भः । तथा चाह भोजराजः--

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥[२] इति ।

स चायं विप्रलम्भश्चतुर्द्धा, पूर्व्वरागमानप्रवासकरुणभेदात्[३] ।

तत्र

श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागस्स उच्यते ॥[४]

तत्र श्रवणं दूतीमुखाद्वन्दि[५]मुखात्सखीमुखाच्चेति त्रिविधम् । दर्शनञ्च इन्द्रजाले, चित्रे, साक्षात्[६], स्वप्ने च दर्शन[ाचतुर्विध]मिति । तत्र दूतीमुखतः श्रवणेन प्ररूढः पूर्व्वरागो यथा--

कुमारीणां रत्नं त्वमसि कमनीयः स च युवा,
भुवः कामः काम्यस्तदिह युवयोस्सङ्गमविधिः ।
इति प्रीता दूती-मधुरवचसा चेतसि चिरं
दधाना तं वामा वत वहति रामाऽतनुदशाम् ॥७॥

वन्दिमुखतः श्रवणेन प्ररूढः पूर्व्वरागो यथा--

---

१. B reads तत्राभीष्टमनावाप्तावप्रकृष्टा
२. *Sarasvatīkaṇṭhābharaṇa*—V—45 (p. 559), Nirnaya Sagar Press, Bombay, 1934 edition.
३. B inserts विप्रलम्भ between करुण and भेदात्
४. *Sāhityadarpaṇa*—III-216 (p. 239), Kshemraj Shrikrishna Dass, Bombay, Samvat 1973 edition.
५. B reads वन्दी
६. B reads साक्षात् दर्शनञ्च इन्द्रजाले च चित्रे च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतस्याश्चित्तकूपे गुणविततिभृता वन्दिवाचोपनीता
श्यामा रामाभिरामाभिनवतनुरुचिः पाण्डिमानं तनोति
नैतच्चित्रं चरित्रञ्चपलयति मनो मानवानां नवाना-
मञ्चत्पञ्चेषुबाणव्यसनहृतहृदां रीतिरन्या विभाति ॥८॥

सखीमुखतः श्रवणेन प्ररूढः पूर्व्वरागो यथा--

सखीभ्यः श्रीकृष्णं श्रवणपथमानीय सरसं
परक्षोणीपालश्रवणविमुखीभूय सुमुखी ।
विदर्भाधीशस्य व्यवसितिमनुस्मृत्य परथा
श्लथाश्वासाश्वासानिलतरुणिमानं कलयति ॥९॥

इन्द्रजालदर्शनात् स यथा--

विष्वक् संवीक्ष्यमाणोऽप्यहह न भजति स्पर्शमक्षामरोचिः
कुर्व्वन्नस्राम्बुपूरानपि पृथुमभितः शोषमन्तस्तनोति ।
पृष्टः प्रत्युत्तरेण श्लथयति न मनस्तापमालापशीलो
दृष्टः कोऽपीन्द्रजाले तदवधि निकटे नः करोतीन्द्रजालम् ॥१०॥

चित्रे दर्शनात् स यथा--

स्फुटमालिखितो मयाद्य दृष्टः सखि ! मामालिखितामसौ तनोति ।
अपुरापरिशीलितः प्रमोदं दृशि तनुते हृदि तापमादधाति ॥११॥

साक्षाद्दर्शनात्स यथा--

अम्भोलीलाविसरविलसन्नालमालोलयाऽऽसोद्
दृष्टः कूले यदवधि मया नीरदो नीलनीलः ।
अश्रुव्याजात्तदवधि सखि ! स्फीततारानुकारा
वारान्धारास्त्यजति स दृशोरन्तरासीन एव ॥१२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वप्ने दर्शनात्स यथा—

चित्रं चित्रं सहचरि! मुहुस्तापयत्यङ्गमङ्गं
चित्ते चिन्तां चतुरिमचयं चोरयन् सञ्चिनोति।
कारङ्कारं वसति हृदये गाढमोहान्धकारं
दृष्टः स्वप्ने कुवलयदलश्यामलः शीतभानुः ॥१३॥

अत्राभिलाषः स्मृतिश्चिन्ता गुणकथनमुद्वेगः प्रलाप उन्मादो व्याधिर्जडता मरणमिति दशकामदशा भवन्ति। तदुक्तं साहित्यदर्पणे—

अभिलाषस्मृतिचिन्तागुणकथनोद्वेगसंलापाः।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः ॥[1]

तत्राभिलाषः स्पृहा। स्मरणं स्मृतिः। प्राप्त्युपायादिचिन्तनं चिन्ता। गुणानां कथनं गुणकथनम्। दुःखविशेष उद्वेगः[2]। अलक्ष्यवचनं प्रलापः। स एव कारिकायां संलाप इति कथितः। चेतनाचेतनविवेकविरह उन्मादः। पाण्डुताकृशतादिर्व्याधिः। हीनचेष्टत्वं जडता। प्राणवियोगो मरणमिति।

अभिलाषो यथा—

सखि रोधसि यामुने वितन्वन् मुरलीनादमनादरं विधूय।
कलितः कुतुकान्मयाशया यः कमनीयः स दृशोरशोकदः स्यात् ॥१४॥

स्मृतिर्यथा—

नीलाम्भोदं वियति विषमालोकमालोकयन्त्याः
स्मृत्यारूढः सकृदपि परं वीक्षितो नन्दसूनुः।

---

१. *op. cit.*—III-218 (p. 239 reads अभिलाषश्चिन्तास्मृति-गुणकथनोद्वेगसंप्रलापाश्च' in the first half).

२. B reads दुखविशेषोद्वेगः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चेतश्चन्द्रोपलमिव बलादेव पीयूषधामा
द्रावं द्रावं नयनशिरयाचारयद्वारिपूरान् ॥ १५ ॥

चिन्ता यथा—

नाधीना प्रतिवेशिनी सहचरी नो कापि चेतश्चरी
लोकेऽस्मिन् कुलकन्यकासमुचितो न स्वैरचारग्रहः ।
दृष्टस्यैव नवीननीरदरुचश्चित्तैकचोरस्य मे
भूयोवीक्षणमप्यनुक्षणमहो क्षेमाय भूयात्कथम् ॥ १६ ॥

गुणकथनं यथा—

आलि ! स्मेराननघनरुचो दृष्टमात्रस्य दैवात्
ध्यायं ध्यायं गुणगणमनालेखमीषल्लिखन्त्याः ।
एतच्चेतःफलकमनलं सूक्ष्मभावादभून्मे
स्फीताप्येषा सपदि धिषणालेखनी क्षीयतेस्म ॥ १७ ॥

उद्वेगो यथा—

अस्पृष्टेव[1] मृणालिका स्थलगता म्लाना तनुस्ताम्यति
स्फारास्या विजने गलत्यविरतं धारा दृशोरन्तरात् ।
निद्रा नैव निशागमे निरुपमा सापिच्छविः क्षीयते
पृष्टाया[2] अपि नोत्तरं कथमसावाधिः समाधीयताम् ॥ १८ ॥

प्रलापो यथा—

किन्नो पश्यसि सञ्चरन्ति गुरवः किं वक्षि किन्तावता
किन्नो वेत्सि कुमारिकासु निगमादिष्टां पराधीनताम् ।
किं ब्रूषे मदनागमोऽयमपरः प्रौढः परिभ्राजते
किं वच्मि स्वहितं चरेति विजने वाणी बलाज्जल्पति[3] ॥ १९ ॥

---

१. B reads च   २. B reads पृच्छाया
३. B reads जल्पति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उन्मादो यथा—

वृन्दारण्यसमीरधीर भवतो नत्वा पदं प्रार्थये
दृष्ट्यैवाहरतो मनो मुरभिदः क्षेमं क्षणं ब्रूहि मे ।
भ्रातः ! किञ्च निवेदय स्वयमितो गत्वाशु तस्यान्तिके
चित्तेनादधती भवन्तमबला जीवेन्न जीवेदपि ॥ २० ॥

व्याधिर्यथा—

शक्ता गन्तुं क्वचिदपि न सा नेक्षिता शय्यिकाया-
मित्यावेगादहह चतुरा कापि तस्या वयस्या ।
मल्लीमालाः सपदि शयने न्यस्य दाहादमूषां
सप्राणायाः सरसिजदृशो निश्चिकायाथ कायम् ॥ २१ ॥

जडता यथा—

भित्तौ लग्ना हिमचयमुचो नीरधारागृहस्य
स्निग्धालीभिः प्रथमसमयं चित्रमित्येव दृष्टा ।
पश्चात्तन्वी कमपि विलसद्वारिवेश्मोपतापं
तापं मत्वा विततमभितः प्रत्यभिज्ञायतेस्म ॥ २२ ॥

मरणममङ्गलत्वान्नोदाह्रियते ।

अत्र पूर्व्वरागादिघटकोऽनुरागस्त्रिधा । नीलीरागः कुसुम्भरागो मञ्जिष्ठा-राग इति । तत्र यो नात्यन्तं शोभते न चापैति सोऽयं नीलीरागः । योऽत्यन्तं शोभतेऽपैति च सोऽयं कुसुम्भरागः । योऽत्यन्तं शोभते नापैति कदाचित् सोऽयं मञ्जिष्ठारागः । तदुक्तं साहित्यदर्पणे—

"न चातिशोभते यन्नापैति प्रेम मनोगतम् ।
तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुसुम्भरागं तं प्राहुर्य्यदपैति च शोभते ।
मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते ॥"[1] इति ॥

तत्र नीलीरागो यथा—

भूयो भूयः श्रवणदिवसाच्चिन्तितश्चारुबुद्ध्या
ध्यानादारात् कथमपि मया नाथ ! साक्षात्कृतोऽसि ।
सद्यस्सङ्गात्तदनु विधिना मोचिताहं दधाना
बाधाः केन प्रतिहतमिदं जीवनं धारयामि ॥२३॥

कुसुम्भरागो यथा—

अन्योन्यालयकैतवागमकृतोरन्यानुलापच्छलान्
मोदादालपतोः परस्परमविस्पष्टं मुहुः पश्यतोः ।
स्वं स्वं गोपयतोस्समस्तचरितं यूनोर्मनोजादपि
द्वित्राण्येव दिनानि कोऽपि परितः प्रेमापरं राजते ॥२४॥

मञ्जिष्ठारागो यथा—

अन्योन्यानृजुवीक्षणैर्जितसुधालापैस्समन्दस्मितैः
सानन्दाधरबिम्बचुम्बनपरीरम्भक्रियाकौतुकैः ।
रम्यः सम्यगुपाहितोदयगणो यो वासरे वासरे
स प्रेमा तपसाऽपि दुर्लभतरो यूनोः परिभ्राजते ॥२५॥

कोपविशेषो मानस्तद्दशाविशिष्टो यूनोरनुरागो मानविप्रलम्भ इति गीयते । स च मानो द्वेधा, प्रणयमान ईर्ष्यामानश्च । तत्र प्रेम्णः कुटिलगामितया कारणं विना यः कोपः स्त्रियास्स प्रणयमान इति कथ्यते । तदुक्तं साहित्यदर्पणे[1]—

---

१. *op. cit.*—III-224, 225ab and 226ab (p. 246, reads रागं तद् for रागं तं and रागमाहुस्तत् for रागमाहुस्तं)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"मानः कोपस्स च द्वेधा प्रणयेर्ष्यासमुद्भवः ।
द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि ॥
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना ।[१]" इति ।

स यथा—

त्यक्ता हासकथा श्लथा समजनि प्रौढाऽपि मोदावली
त्यक्तो वा धनलालसः[२]परिजनप्रत्ययस्तवायं जनः ।
संसक्ताऽपि[३] सखीयमद्य लभते नैव त्वदाभाषणं
नो जाने गुणगौरि ! कारणमभूत् कोपस्तवायं यतः ॥२६॥

ईर्ष्यामानस्तु त्रिविधः । संक्षेपतः पराङ्गनासङ्गमस्य दर्शनजन्मा, श्रवणजन्मा, अनुमानजन्मा चेति । तत्रानुमान[४]जन्माऽपि त्रिविधः स्वप्नायितजन्मा, भोगाङ्कजन्मा, गोत्रस्खलनजन्मा चेति । तदुक्तं साहित्यदर्पणे—

"पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ।
ईर्ष्यामानो भवेत्स्त्रीणां ततस्त्वनुमितिस्त्रिधा ॥
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा ।"[५] इति

पराङ्गनासङ्गदर्शनजन्मा यथा—

मुग्धाक्षि ! क्षमया धरित्रि ! रचय क्षेमं प्रसादेन मे
शङ्कामाशु विमुञ्च सिञ्च सुधया वाचानुतप्तं वपुः ।
एवं व्याहरति प्रिये प्रियतमा स्फाराम्बुपूरे दृशौ
बिभ्राणालपतिस्म नाथ ! कलितस्त्वं यादृशस्तादृशः ॥२७॥

---

१. *ibid.*—227 and 228 ab (p.247, reads स तु for स च)
२. B reads व्यक्ताराधनलालसः   ३. B reads संशक्ता
४. A omits तत्र
५. *op. cit.*—III-228cd and 229 (p. 250, reads तत्र स्वनु० for ततस्त्वनु०)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पराङ्गनासङ्गश्रवणजन्मा यथा—

खलोक्ति ऽप्रव्यक्तारणिघटनजातः प्रविततो
मयान्यस्या नामग्रहणकृतकार्य्यैक[1]विधिना।
प्रिये ! मानस्तेऽसावनल इव तं सम्प्रति विशन्-
नहं नास्मिन् म्लानस्त्यज सुमुखि ! मानग्रहमिमम् ॥२८॥

अनुमानजन्मसु[2] स्वप्नायितजन्मा यथा—

खेदावेशवशादभूषिततनुस्तन्वी निनाय क्षत-
क्षेमं वासरमेकवत्सरमिव प्राप्तप्रदोषे प्रिये।
सस्नेहेऽनुनयत्यनुक्षणमसावालीं निजामादिशन्-
नैशं स्वप्नवचः पठन् सखि ! शुकः सद्यस्समानीयताम् ॥२९॥

भोगाङ्कजन्मा यथा—

पादान्तप्रणते प्रिये विधुमुखि ! त्वं केन चित्तेऽधुना
रागम्भावयसीति जल्पति कलाभिज्ञे वयस्याजने।
प्राह प्रोदितकोपवक्रिमवलद्भ्रूवल्लिलीलाकुला
मुग्धे ! किं वदसि त्वमेतदलिके ! नारक्ततामीक्षसे ॥३०॥

गोत्रस्खलनजन्मा यथा—

त्वत्प्रेमैकवशस्त्वदुत्तमवचःपीयूषपानोत्सुकः
कान्तोऽयं कथमेनमब्जनयने ! नाभाषसे भावतः।
नाभाष्यस्सखि ! केन हन्त ! मरणेनैष त्वया शीलितो
वारंवारमसौ मया निपुणया सलूँलक्षितो गोत्रभित् ॥३१॥

मानभञ्जकाश्च षडुपायाः साम[3] भेदो दानं नतिरुपेक्षा रसान्तरं चेति।

---

१. B reads चार्यैक २. B omits सु
३. B reads सामो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुक्तं साहित्यदर्पणे—

"साम भेदोऽथ दानञ्च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्य्यात् षडुपायानिति क्रमात् ॥
तत्र प्रियवचस्साम, भेदस्तत्सख्युपार्ज्जनम् ।
दानं व्याजेन भूषादेः, पादयोः पतनं नतिः ॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम् ।
रभसात्त्रासहर्षादेः कोपभ्रंशो रसान्तरम्[१] ॥" [२]इति ॥

ते षडुपाया यथा—

सप्रेमानुनयं विधाय विधितः कृत्वा सखीं तत्सखीं
दत्त्वा हारमपिच्छलेन पदयोः सम्यक् निपत्यादरात् ।
दृष्ट्वा कोपवतीं तथापि रमणीं सावज्ञमागाद् बहिः
प्रत्यावृत्य विरच्य वेषविकृतिं चक्रे सहासां शठः ॥३२॥

प्रवासो भिन्नदेशता, तद्दशाविशिष्टो यूनोरनुरागः प्रवासविप्रलम्भ इति गीयते । तत्र प्रवासस्त्रिधा । कार्यजः शापजः संभ्रमजश्चेति ।

तदुक्तं साहित्यदर्पणे—

"प्रवासो भिन्नदेशत्वं कार्य्याच्छापाच्च सम्भ्रमादि"[३]ति ।

सम्भ्रमो दैवाद्युत्पातनिपातः । कार्य्यजोऽपि त्रिविध[४] । भूतो भवन् भावी चेति ।

---

१. B reads रसान्तर इति
२. *op. cit.*—III—230-232 (pp. 251-252, reads भूषादिः)
३. *ibid.*—233ab (p. 253)
४. B reads त्रिधा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुक्तं तत्रैव—

"भावी भवन् भूत इति त्रिधा स्यात्तत्र कार्य्यज"[1] इति ।

तत्र भूतः कार्य्यजो यथा—

सत्कारालयरोहिणीश[2]कलितक्लेशा विवस्वत्सुता
मा भूद्वेणिमती वलत्कुवलयापीडातिपीडापरा ।
दुष्प्रापा मधुरापि सम्प्रति सखे ! त्वद्गेह एव स्थिता
तत्किं भ्राम्यसि ताम्यसि प्रतिदिनं तीर्थाटनक्लेशनैः ॥३३॥

भवन् कार्य्यजो यथा —

यामि प्रेयसि ! मुञ्च सत्वरमिति प्रोक्ताक्षरेषु क्रमा-
देषा सुष्टु वाप[3](?) तापमभवत्पाण्डुः कृशाऽसद्रुचिः ।
सम्प्राप्ता धृति[4]मास(?) चेतसि निरालम्बा पुनस्तन्मयी
सोन्मादानुविमूर्च्छिताथ भजतां शिष्टैरशेषं दशा ॥३४॥

भावी कार्य्यजो यथा—

सुप्ताया दयितान्तिकेऽपि सुदृशो दृग्वारिबिन्दूत्करे
स्वं स्वं कान्तिभरं समर्प्य चलितास्तारा असाराः[5] क्वचित् ।
आस्येनैव सहायमासविगत[6]श्रीकः कलानां निधि-
र्म्मन्ये दीपशिखापि पाण्डुरभवत्तन्वीतनोः प्रश्रयात् ॥३५॥

शापजो यथा—

त्वामाकल्प्य हृदा निसर्गसुभगामाश्लेषमोदोत्सुको
यावद् बाहुयुगप्रसारणमहं लिप्सेऽथ तावन्मम[7] ।

---

१. *op. cit.*—III—238ab (p.255)

२. B reads—सकलित

३. B reads सुष्ठुरवाप

४. B reads सम्प्राप्ताऽधृतिमान

५. B reads ताराऽथसाराः

६. B reads विगतः

७. B reads मनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चित्ते मन्थरता प्रभूय कुरुते वैफल्यमत्रोद्यमे
वच्मि प्रेयसि किन्तु दुस्तरतरा शापोद्भवा वेदना ॥३६॥

सम्भ्रमजो यथा—

कोऽयं श्वेतभुजङ्गमस्सखि ! करे, नायं फणी, किन्तदा,
माला सौमनसी मृगाक्षि ! हृदये शं ते विधत्तामिथम् ।
क्वागास्त्वं हृदयेश ! हन्त ! परितो दाहाकुले पत्तने
धिङ् मां या न गता सहैव विपिने किञ्चाकुला भ्राम्यति ॥३७॥

अत्र प्रवासे दशकामदशा भवन्ति । तदुक्तं साहित्यदर्पणे—

"अङ्गेष्वसौष्ठवन्तापः पाण्डुता कृशताऽरुचिः ।
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः ॥
मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह ।
असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः ॥
अरुचिर्व्वस्तुवैराग्यं सर्व्वत्रारागिता धृतिः ।
अनालम्बनता चापि शून्यता मनसः स्मृता ॥
तन्मयं तत्प्रकाशादि बाह्याभ्यन्तरतस्तथा ।"[1] इति ।

अत्र पाण्डुता कृशतेत्येका दशा गणनीया व्याधित्वेनैक्यसम्भवात् । उन्मादः पूर्व्वलक्षितो बोध्यः । मूर्च्छा चैतन्यविरहः । एताश्च मृतिवर्जिता दशा भवत्कार्यजप्रवासोदाहरणे दर्शिता इति नेह दर्श्यन्ते ।

यूनोरेकतरस्मिन् मृते पुनर्ल्लभ्ये वसति यदेकः खिद्यते तत्खेददशा-विशिष्टस्तदनुरागः करुणविप्रलम्भः । तदुक्तं साहित्यदर्पणे—

"यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदेकस्तदा भवेत्करुण[2]विप्रलम्भाख्यः ॥"[3] इति ।

---

१. *op. cit.*—III—234cd-237 (pp. 253-254, reads) प्रकाशः स्याद् for प्रकाशादि) २. भवेत्करुण missing in B.
३. *op. cit.*—III—239 (p. 258, reads यदैकः for यदेकः & रसः for भवेत्)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स च पुण्डरीकानुरक्ताया महाश्वेतायाः कादम्बर्य्यामुपवर्णितो द्रष्टव्यः ।

सम्मटभट्टास्तु—

प्रवासाभिलाषविरहेर्ष्याशापरूपोपाधिभेदात्पञ्चविधो विप्रलम्भः ।

प्रवासो दूरदेशगमनम् । अभिलाषः संयोगात्प्राक् श्रवणादिजनितः समीहारूपः । विरह आगमनसमुचितेऽपि समये प्रियानागमजनितः[1] क्लेशः ।

कादम्बर्य्यां महाश्वेतावाक्ये च करुण एव रसो न श्रृङ्गार इत्यक्षर-तात्पर्य्याभ्यामाहुः । तच्चिन्त्यम् । प्रवासाद्विरहस्य पृथग् गणनमयुक्तम् । विरहस्थलेऽपि प्रवासस्यैवोपाधितासम्भवात् । न हि विरहोत्कण्ठितायाः प्रियः सन्निधौ वर्त्तते येन प्रवासस्तत्र न स्यात् । न च प्रियगमनजनित-दुःखात् समुचितप्रियानागमनजनितं दुःखं विलक्षणमिति पृथग् गण्यत इति वाच्यम् । अतिचिरप्रवासजनितदुःखस्य ततोऽपि विलक्षणतया तस्यापि पृथग् गणनापत्तेः । एवं शापस्यापि पृथग् गणनमनुचितं तत्रापि प्रवासस्यैव सम्भवात् । न ह्यसन्निधानमन्तरा शापः संयोगं विघटयति किन्तु प्रवास-सम्पादनद्वारा प्रकारभेदमात्रेण पृथग् गणने कार्य्यजप्रवासात् सम्भ्रमज-प्रवासस्यापि पृथग् गणनापत्तेः । यच्चोक्तं[2] 'महाश्वेतावाक्ये करुणो रसो न श्रृङ्गार' इति तदपि न विचारचारु । तथा सति वियोगे सर्व्वत्र करुण एव रसः किन्न स्यात् । भविष्यत्प्राप्तिनिश्चयेन प्रवासादौ रतिरेव शोकेन पुष्टा भवतीति चेत् महापुरुषवचनादिना तत्रापि भविष्यत्प्राप्तिनिश्चयादिति कृतं पल्लवितेन ।

अन्योन्यदर्शनस्पर्शनादिक्रियाविशिष्टो यूनोरनुरागः सम्भोगश्रृङ्गारः । स च चुम्बनपरिरम्भणादिभेदात्संख्यातुमशक्य इति पूर्व्वाचार्य्यैरेक एव गणितः । तदुक्तं साहित्यदर्पणे—

१. B reads प्रियाणां गमन—

२. B reads यथोक्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योऽन्यं स सम्भोग उदाहृतः ॥
संख्यातुमशक्यतया चुम्बनपरिरम्भणादि बहु[1] भेदात् ।
अयमेक एव धीरैः कथितः[2] सम्भोगश्शृङ्गारः ॥"[3] इति ।

स यथा—

सञ्जाते समयात्यये चलितयोरन्योन्यवेषग्रहाद्
गूढाकारपटीयसोर्म्मिलितयोर्म्मध्येऽभिसाराध्वनः ।
राधामाधवयोः क्षणं विमनसोस्तूष्णीमनुस्मेरयोस्
साभिज्ञानममान[4] माहितपरीरम्भोत्सवः कोऽप्यभूत् ॥३८॥

[5]शृङ्गारस्थायिभावतया पूर्व्वमुक्ता या रतिस्साष्टधा भवति—नैसर्गिकी, सांसर्गिकी, औपमानिकी, आध्यात्मिकी, आभियोगिकी, साम्प्रयोगिकी, आभिमानिकी वैषयिकी चेति । यदाह महाराजः—

"रतिर्न्निसर्गसंसर्गौपम्याध्यात्माभियोगजा ।
सम्प्रयोगाभिमानोत्था विषयोत्था च कथ्यते ॥"[6]

तत्र स्वभावादेव समुत्पन्ना नैसर्गिकी सा यथा—

स्फीतासीमगुणग्रहेण हरिणा तुल्येऽप्यतुल्येऽपि च
प्रौढे देवगणाधिपे स्थितवति व्यक्तोल्लसल्लालसे ।
प्रादुर्ब्भूय निजत्विषा दशदिशो विद्योतयन्त्याः श्रियः
सर्व्वानेव सुरान् विहाय सरसा दृष्टिः पपाताच्युते ॥३९॥

---

१. बहु missing in A २. B reads कथितो धीरैः
३. *op. cit.*—III—240-241 (p. 260, reads सम्भोगोऽयमुदाहृतः for स सम्भोग उदाहृतः)
४. B reads—समान— ५. B reads शृङ्गारे
६. *Sarasvatīkaṇṭhābharaṇa*—V—165 (p. 595).

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभीष्टवस्तुसंसर्गादुत्पन्ना सांसर्गिकी । सा यथा--

असौ दूराद्दृष्टः प्रथमुपगतस्तुङ्गशिखरः
प्रियावासे लीलाललित इह सौधो विलसति ।
यदालोके लोके सकलकमनीयो नयनयोः
प्रमोदः प्रोदञ्चन्मम मनसि तापं तिरयति[१] ॥४०॥

अभीष्टसादृश्यादुत्पन्ना औपमानिकी । सा यथा--

गर्ज जलदहत त्वमपि मोदयितासि ।
तदपि, यद[२] च्युततनुरुचिरुचिरो भासि ॥४१॥

शापादितस्संस्कारलोपेन विस्मृतस्य पूर्वमभिलषितस्य दर्शनादेवाध्यात्मसमुत्पन्ना रतिराध्यात्मिकी । सा यथा--

क्षोणीपालकुलावतंस ! भवतः पत्नीयमित्थं मुनेः
शिष्ये जल्पति भूभृतामपि पतिः सस्मार न प्रेयसीम् ।
वाचा किञ्च निषेधमेव बहुशश्चक्रे परन्तु प्रिया-
मालोक्योदितमोदपूरितनू रक्तो[३]ऽभवच्चेतसा ॥४२॥

आलम्बनभूतयोरेकतरस्यानुरागातिशयसूचकव्यापारादन्यतरस्योत्पन्ना रतिराभियोगिकी । यथा तातचरणानाम्--

दरमुद्रितपुण्डरीक[४]मुग्धे नयने कुण्डलिते पुरः प्रियायाः ।
अथ कुण्डलिता ममापि भाले लिपयः शान्तिविवेकधीरतानाम् ॥४३॥

सम्प्रयोगः सम्भोग आलिङ्गनचुम्बनादिव्यापारस्तस्माज्जाता साम्प्रयोगिकी यथा--

हठादेवाश्लिष्टा त्यज शठ ननेत्येव बहुशो
वदन्ती वामाक्षी सदयमनसामोचि रुदती ।

---

१. B reads निरयति
२. B reads तदच्युत--
३. A reads राजा
४. B reads पुण्डरीके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वयस्याऽथ स्फायत्पुलकवलिताऽसौ मसृणया
दृशा मां पश्यन्ती पदमपि पदान्नैव चलिता ॥४४॥

अभिमानो रुचिविशेषस्तस्मादुत्पन्ना रुचिराभिमानिकी । यथा—

एनामेणदृशां समोदमुरसि स्नेहान्निधायासमा-
मक्षोभः क्षपयालि ! तुङ्गशिखरे सौधे सचन्द्राः क्षपाः ।
नास्मादस्त्यधिको वयस्य ! सकले भूमीतले सम्मदो
नाकेनापि च वैजयन्तवलभीरम्भापरीरम्भतः ॥४५॥

विषयप्रभावादुत्पन्ना वैषयिकी । विषयाश्च शब्दस्पर्शरूपरसगन्धाः पञ्च ।
तत्र शब्दप्रभावजा यथा—

वीणां सादरमानिधाय जघने लोलाङ्गुलीलीलया
तन्त्रीमुल्लसितस्मुरामतिरसादास्फालयन्ती क्रमात् ।
गायन्ती ननु पञ्चमं स्वरमसौ तद्भङ्गिभिः सङ्गताऽऽ-
नन्दीकृत्य मनो मदीयमचिराद्बन्दीकरोति स्फुटम् ॥४६॥

स्पर्शप्रभावजा यथा—

असौ स्पृष्टा पीनस्तनजघनदेशे प्रियतमा
तनोति प्रत्यङ्गम्मम रुचिररोमाञ्चमचिरात् ।
त्वगन्यस्मिन् सद्यो हरति करणे पाटवविधिं
मुहुस्सान्द्रानन्दव्यतिकरितमन्तश्च कुरुते ॥४७॥

रूपप्रभावजा यथा—

असौ दैवाद्दृष्टेः पथमवतरन् वल्लवयुवा
मनो बन्दीकृत्य प्रशमयति लज्जामविहताम् ।
विलुम्पन्मर्य्यादामपि कुलवधूनां विघटयन्
विवेकं निःशङ्कः कमपि परितोषं कलयति ॥४८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रसप्रभावजा यथा—

बन्धूकोचितबन्धुरम्बुजमुखि ! स्निग्धोऽधरस्तावक-
स्तत्रान्तस्स[1]कलोपतापशमनः कश्चिद्रसो जायते।
चेतः किञ्च पिपासति प्रसरता तापेन ताम्यन्मुहु-
स्तन्मुग्धाक्षि ! शुचौ रसैकसमये यच्छ्रेयसे तत्कुरु ॥ ४९ ॥

गन्धप्रभावजा यथा—

तनोरुद्यन्त्यस्याः सकलकमनीयः परिमलः
प्रसूने भृङ्गाणां नियतमवहेलां रचयति।
असौ लग्नः स्वान्ते मम विरचयन् मोदनिचयं
वशीकुर्व्वन् सद्यः परविषयसङ्गन्न सहते ॥ ५० ॥

अथ केयं रतिर्न्नाम, या शृङ्गारे स्थायिभावतां भजते ? न तावत् सुखसाधनताबुद्धिरेव सा, विरक्तस्य स्रक्चन्दनादौ परकीयसुखसाधनताबुद्धेरपि रतित्वापत्तेः। अथ स्वकीयसुखसाधनेऽर्थे स्वकीयसुखसाधनताबुद्धिस्तज्जनितेच्छा वा रतिः। यदाह **महाराजः**—

"मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिरि[2]"ति।

साहित्यदर्प्पणकारश्च—

"रतिर्म्मनोऽनुकूलेऽर्थे मनसः प्रवणायितमि[3]"ति चेत्। न। औत्सुक्यस्योत्कण्ठायाश्च रतित्वापत्तेः। तयोर्व्यभिचारित्वेनेष्टापत्तेरयोगात्। एतेन 'इष्टसमीहाजनिता मनोविकृतिरपरिपूर्णा रतिरि[4]'ति वदन्तो **भानुदत्तमिश्रा** अपि विचारणीयाः।

---

१. A reads तावकः and तत्रान्तः
२. *Sarasvatīkaṇṭhābharaṇa*—V—138ab (p. 570)
३. *Sāhityadarpaṇa*—III—203ab (p. 232)
४. *Rasataraṅgiṇī*—p. 13, Kshemraj Shrikrishna Dass, Bombay, Samvat 1971 edition

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्तु 'स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिरि'' ति जगन्नाथपण्डिता अवदन्। तत्तुच्छम्[2]। प्रेमाख्यत्वस्य प्रेमपदवाच्यत्वरूपस्य वाच्यतावच्छेदकाग्रहे दुर्ग्रहत्वात्। तद्ग्रहे च तस्यैव लक्षणत्वौचित्यादिति। मैवम्। यूनोरन्योन्यालम्बनविलक्षणा चित्तवृत्तिरेव रतिः। वैलक्षण्यञ्च तस्याः विलक्षणसुखसाधनताबुद्धिजन्यतया दृढतरवासनासंक्रामकतया च।[3] सुखे च कामिनोर्दर्शनस्पर्शनादिजन्ये वैलक्षण्यमनुभवसिद्धम्। उत्कण्ठादेश्च न दृढतरवासनासंक्रामकत्वं तद्बोधस्य कादाचित्कत्वादिति तद्व्युदासः। पुत्रादिदर्शनादिजन्ये सुखेऽपि वैलक्षण्यसत्त्वात् पुत्राद्यालम्बनरतेश्च स्थायित्वाभावादिति तद्व्युदासाय यूनोरिति। एकमात्राश्रितरतेरनौचित्येन स्थायित्वाभावात्तद्वारणायान्योन्येति। चित्तवृत्तिश्च चित्तस्य परिणामविशेषो वा, चित्तेन जनिताऽऽत्मसमवेतेच्छा वेति यथादर्शनमूहनीयम्। एतत्परतयैव च भानुदत्तमिश्राणां जगन्नाथपण्डितानाञ्च लक्षणरचने सङ्गमनीये सुधीभिर्भाव्यमित्यलमतिविस्तरेण।

ननु, किमिदं स्थायिभावत्वम्? न तावत् स्थायिभावत्वे सति भावत्वं रत्यादीनां चित्तवृत्तिरूपाणाम् आशुविनाशित्वेन स्थायित्वाभावात्। किञ्च रसकारणत्वरूपस्य भावत्वस्यालम्बनादावपि सत्त्वे नातिप्रसङ्गस्य दुरुद्धरत्वात्। न च वासनारूपाणां रत्यादीनां मुहुर्मुहुरुद्बोध एव स्थायिता। व्यभिचारिणान्तु नैवं तदुद्बोधस्य कादाचित्कत्वादिति वाच्यम्, घटाद्याकारवृत्तिजनितवासनाया अपि मुहुर्मुहुरुद्बोधकसमवधाने मुहुर्मुहुरुद्बोधात् तस्या अपि स्थायिभावतापत्तेरिति। मैवम्, प्ररूढरत्याद्यन्यतमत्वमेव स्थायिभावत्वम्। रत्यादयश्च रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयनिर्व्वेदरूपा नव। एतेन रत्याद्यन्यतमत्वं न स्थायिभावत्वं

---

१. *Rasagaṅgādhara*—p. 38, Nirnaya Sagar Press, Bombay, 1947 edition

२. B reads तत्तूक्तम्   ३. च missing in B

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0:In Public Domain. Digitized by Sarayu Trust/eGangotri

रत्यादीनामेकस्मिन् प्ररूढेऽन्यस्याप्ररूढस्य व्यभिचारित्वोपगमात् । प्ररूढत्वाप्ररूढत्वे च बहुल्पविभावजत्वे । तदुक्तं रत्नाकरे—

"रत्यादयः स्थायिभावाः स्युर्भूयिष्ठ[1]विभावजाः ।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ॥"

इतीति जगन्नाथपण्डितानां प्रलपितमप्य[2]पास्तम् । प्ररूढत्वविशेषणेनैव दोषनिरासादित्यलं पल्लवितेन[3] ।

रत्यादेः स्थायिभावस्य यत्कारणं स काव्यारूढो विभावः । तदुक्तम्—
"कारणान्यथ कार्य्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेत्काव्यनाट्ययोः ॥
विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।"[4] इति ।

स द्विविधः, आलम्बनविभावः उद्दीपनविभावश्च । तत्र स्थायिभावस्य विषयविधया कारणमालम्बनविभावः । स द्विविधः, शृङ्गारे नायिका नायकश्च । नायिका तावत् त्रिविधा[5]—स्वीया, परकीया, सामान्या च । तत्र पतिभिन्नेऽननुरक्ता अनुरक्ता च स्वीया । यथा—

एकेन प्रियसाक्षिणा जितवती वीणां वचोभिर्न्निजै-
र्गत्या मन्दिर एव विश्व[6]गमसौ हंसं जिगायाचिरात् ।
वक्त्रेणाद्वयमोदिनेन्दुमजयत्सर्व्वप्रमोदप्रदं
दृष्ट्वा लक्ष्यपदाग्रयैव दलयत्यम्भोरुहाणाम्मदम् ॥५१॥

---

१. A reads भूयश्च　　२. प्य missing in B
३. B reads परेण
४. *Kāvyaprakāśa*—IV—27 and 28ab (pp. 85-86 reads चेन्नाट्यकाव्ययोः)
५. B reads त्रिधा　　६ विश्व missing in B

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वीया[1]पि त्रिधा—मुग्धा, मध्या, प्रगल्भा चेति। तत्र भाववती मुग्धा। भावश्च प्राथमिको मदनविकारः। तदुक्तम्—

"निर्व्विकारात्मके चित्ते भावः प्रथमविक्रिया।"[2] इति।

'प्रथमावतीर्णयौवनमदनविकारा रतौ वामे'[3]त्यादि साहित्यदर्प्पणकारोक्तलक्षणवाक्यस्याप्यत्रैव तात्पर्य्यम्। सा यथा—

चक्षुः पद्मतया मुखं विधुतया वल्लीतयैषा तनु-
र्व्वाक् पीयूषतयाऽधरः किसलयीभावेन सम्भाव्यते।
मन्येऽस्या ललिताङ्गरङ्गवलितः कोऽपीन्द्र[4]जालीनटः
कामः कामयते सुकौशलकलामुद्घाट्य कौतूहलम् ॥५२॥

अस्यास्तु कामतो लज्जाऽधिका। यथा—

वक्त्रं वीक्षितुमञ्चितभ्रु लपितुं सप्रेम[5]रस्यस्मितं
कान्तोपान्तमपि प्रयातुमधिकं बालेयमालज्जते।
किञ्चान्यत्कथयामि जातु न परैरालक्ष्यते लक्षणै-
रस्यास्तु त्रपयैव चेतसि गतश्चेतोभवो व्यज्यते ॥५३॥

इयमेव लज्जाभयपराधीनरतिर्न्नवोढेत्युच्यते। यथा—

शून्यं केलिगृहं व्रजालि! विविधान्यालोक्य स्वेच्छया
चित्राणीति करे करेण कलिता नीता सखीनाङ्गणैः।
तत्रच्छन्नमुदीक्ष्य कान्तमचिरादीषद्विहस्योल्लसत्-
सुभ्रूभङ्गनिवारितालिनिवहा गेहादयासीद् बहिः ॥५४॥

---

१. B reads स्वकीया
२. *Sāhityadarpaṇa*—III—118cd (p. 170)
३. *ibid*—III–83ab (p. 138)
४. A reads कामीन्द्र-
५. B reads सत्प्रेम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विस्रम्भादेषैव विस्रब्धनवोढा । यथा—

अतिमधुरवचः प्रपञ्चलीलाचतुरसखीजनयन्त्रिता कथञ्चित् ।
प्रियशयनमुपेत्य संविधाय स्वपिति हठादुपधानमन्तरालम् ॥५५॥

यौवनज्ञानाज्ञानाभ्यां मुग्धा द्विविधा । ज्ञातयौवनाऽज्ञातयौवना चेति ।
तत्र ज्ञातयौवना यथा —

पांशुक्रीडे सरसमनसाऽनल्पमाकल्पितासि
त्वं पाञ्चालि ! प्रणयललितं स्वैरमानर्त्तिताऽसि ।
सम्प्रत्येषा स्मरपरवशे चेतसि व्यक्तिरन्या
नाहं नेदृक्विषयविषमा शेमुषीयं ममापि ॥५६॥

अज्ञातयौवना यथा—

या पूर्व्वं विनिवेशितैव गणशः साऽप्यद्य काञ्चीलता
न श्रोणौ विनिवेशमेति किमिति व्यग्रा धुनीते करौ ।
अज्ञातोन्नतिभाजि वक्षसि पुरा संशोलितं चोलकं
सम्प्रत्यादधती विमुग्धहृदया बालाऽबला ताम्यति ॥५७॥

हाववती मध्या । हावश्च किञ्चित्प्रौढो मदनविकारात्मको भाव एव ।
तदुक्तम्—"भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते ।"[1] इति

अस्याश्च कामलज्जे समे । यथा—

आलीभिर्व्विविधानवद्यवचसामालीभिरुत्साहिता
नीता सुन्दरकेलिमन्दिरमथैताभिः प्रयाते बहिः ।
पर्य्यङ्के न पदं दधाति न पुनर्गन्तुं गृहादीहते
सुप्ते प्रेयसि कैतवान्नववधूश्चित्रार्पितेवाभवत् ॥५८॥

---

१. *Sāhityadarpaṇa*—III—119cd (p. 170 reads उच्यते for इष्यते)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हेलावती प्रगल्भा। हेला चातिप्रौढो मदनविकारः। तदुक्तम्—

"हेलात्यन्तसमालक्ष्यविकारः स्यात्स एव हि।"[१] इति।

सा यथा—

गतवति गृहमध्यादालिवर्गे निगूढं
स्थितवति रतिरीतिप्रेक्षणोत्के मृगाक्षी।
व्यजनपवनयोगादाशु निर्व्वाप्य दीपं
हरति रमणनिद्रां पाणिनिष्पीडनेन ॥५९॥

धैर्य्याधैर्य्यतदुभयोपाधिभेदात् मध्या प्रगल्भा च प्रत्येकमपि त्रिविधा।[२] धैर्य्यन्नाम मुक्तात्मश्लाघामनोवृत्ति[३]रचञ्चला। तदुक्तम्—

"मुक्तात्मश्लाघना धैर्यं मनोवृत्तिरचञ्चला।[४]" इति।

अधैर्य्यन्तु[५] चञ्चला मनोवृत्तिः। तत्र मध्या धीरा वक्रोक्त्यैव कोपं प्रकाशयति। अधीरा परुषोक्त्यैव। धीराधीरा रुदितैरेव। प्रगल्भा धीरा बहुतरादरप्रकाशसुरतौदास्याभ्याम्। अधीरा तर्ज्जनताडनादिना। धीराधीरा सोल्लुण्ठ[६]भाषणेन। तदुक्तं साहित्यदर्प्पणे—

"प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा।
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः॥
प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा।
उदास्ते सुरते तत्र दर्शयेदादरान् बहिः॥

---

१. *ibid.*—III—120ab (p. 171).
२. A reads द्विविधा
३. वृत्ति missing in B
४. *Sāhityadarpaṇa*—III—123ab (p. 175)
५. B omits तु
६. B reads सोत्कण्ठ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुम् ।
तर्ज्जयेत्ताडयेदन्या................॥"[1] इति ।

सोत्प्रासवक्रोक्त्येति सातिशयवक्रोक्त्येत्यर्थः । तत्र मध्या धीरा यथा—

स्मितोद्भेदभ्राजत्पुलकितकपोलाऽऽलप मुहुः
पुरः स्फायद्व्रीडावलयितदृशाऽऽलोक्य चिरात् ।
तथाप्यद्योन्मीलन्नलिनदलविद्रोहिनयने
वदत्येषा कोपं त्वमहमिति भेदव्यवहृतिः ॥ ६० ॥

मध्याऽधीरा यथा—

कितव ! कुरु कथाभिः कौतुकं मत्पुरस्तात्
प्रकटय मयि सम्यक् सौहृदं साधुवृत्तैः ॥
उपल इव रसेन व्यक्तमार्द्रीकृतोऽपि
त्यजसि न कठिनत्वं नाथ ! युक्तं तवैतत् ॥ ६१ ॥

मध्या धीराधीरा यथा—

गतवति समयं समीपमद्यानुनयशतानि वितन्वति प्रयत्नात् ।
अहह मयि कृतागसि प्रियाया नयनयुगं गलदश्रुपूरमासीत् ॥ ६२ ॥

प्रगल्भा धीरा यथा—

प्राप्ते सागसि सा प्रिये मयि जवादुत्थाय कान्ता तनुः
श्रान्तोऽसीति जलार्द्रया विधुमुखी संवीज्य मामालपत् ।
नाथ ! त्वं सुभगोऽसि केलिषु कलाभिज्ञोऽसि रामामनः-
कामाराधनतत्परोऽसि न भवेः कस्यानुरागैकभूः ॥६३॥

प्रगल्भाऽधीरा यथा—

दृष्ट्वा कौस्तुभमध्यगां निजतनुं कान्त्या तवोरःस्थले
सम्प्रत्यावसतीति सिन्धुसुतया हारेण बद्धो हरिः ।

---

१. *op. cit.*—III—86cd—89a (pp. 145-148, reads दर्शयन्त्यादरान्, खेदयत्यमुम् and वर्जयेत्)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मूर्त्तिं स्वां मुकुरे विलोक्य कथयेत्यस्याहिते दर्प्पणे
वीक्ष्य स्वाकृतिमुद्गतत्रपहृदोन्मुच्यानयाऽऽलिङ्गितः ॥६४॥

प्रगल्भा धीराधीरा यथा—

किमिदमनुनयस्यारम्भणसम्भ्रमेण
प्रियतम ! तव नागः किञ्चिदालोकयामि ।
मम भवति निरस्तव्याजमासक्तबुद्धेः
फलपरिणतिरेषा युज्यते मूढतायाः ॥६५॥

एते धीरादिभेदाः जैष्ठ्यकानिष्ठ्याभ्यां द्विविधाः । जैष्ठ्यं पत्युरधिकप्रेमपात्रत्वम्, कानिष्ठ्यम् अल्पप्रेमपात्रता । तत्र धीरा ज्येष्ठा कनिष्ठा च यथा—

एतत्कञ्चुकमङ्गुरीयकमिदं कस्याः किमत्र प्रियं
सौरस्यादिति पृष्टयोर्दयितयोस्तूष्णीमनुस्मेरयोः ।
एकामङ्गुलिमुद्रया स्मितपटुः सन्तोष्य तत्कञ्चुकं
तामन्यां परिधापयन् प्रियतमः प्रत्यङ्गमालिङ्गति ॥६६॥

अधीरा ज्येष्ठा कनिष्ठा च यथा—

मालां जातिमयीं पुरो विनिहितामेकामुदीक्ष्याददे
कान्तैनामहमित्यतिक्रमकृतोरेणीदृशोः कामुकः ।
आनीयार्प्पय मालतीशतमतः पश्चाद्गृहाणेत्यसा-
वेकां प्रेषितवान् परोरसि करस्पृष्टे स्तने न्यस्तवान् ॥६७॥

धीराधीरा ज्येष्ठा कनिष्ठा च यथा—

आदातुं प्रविसारितस्वकरयोर्व्वाचापरं धीरयो-
रेकस्या नयने पिधाय सविधोपस्थापितैकस्तनम् ।
वक्षस्याकलयन् स्वकीयमचिरादुत्तार्य्य हारं परं
तामन्यां परिधापयन् प्रियतमो गण्डे चुचुम्ब क्षणम् ॥६८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवित्तोपाधिकपरपुरुषानुरागा परकीया। यत्तु 'अप्रकटपरपुरुषानुरागा परकीये'ति तच्चिन्त्यम्, लक्षितायामसत्त्वात्। "परेण लक्षिते प्रेम्णि त्रासो यस्य न विद्यत' इति तल्लक्षणात्। यदि च प्रथमारूढोऽनुरागः परकीयायाः शङ्काकवलितत्वेन न प्रकट इति तदुपलक्षितत्वमादाय लक्षितायामपि लक्षणं सङ्गमनीयमिति। यदि वा अप्रकटो धनोपाधिकत्वेन न प्रसिद्धः परपुरुषानुरागो यस्यास्सा तथेत्यर्थ आद्रियते तदा तुष्यन्तु प्राञ्चः। सा तु द्विविधा—परोढा, कन्यका च। कन्यकापि पित्राद्यधीनतया परकीया। तत्र परोढा यथा—

निजभवनपतिः प्रवासमैच्छन्नगर इहोपपतिः स्थिरो बभूव।
बहिरियमसुखं प्रकाशयन्ती हृदि हरिणायतलोचना जहास ॥६९॥

कन्यका यथा—

उपयमनविधानव्याकुले बन्धुवर्गे
विरचयति वयस्यामण्डले मण्डनानि।
उपपतिमुपयातं प्रेक्षमाणा पुरस्तात्
स्तिमितनयननिर्य्यद्बाष्पपूरा रराज ॥७०॥

विदग्धा-लक्षिता-गुप्ता-कुलटा-मुदिता-रुषिताऽनुशयानाः परोढाभेदाः। तदुक्तं गङ्गानन्दकवीन्द्रेण—

"विदग्धा लक्षिता गुप्ता कुलटा मुदिता तथा।
रुषितानुशयानाद्याः परोढान्तर्गता मता॥"[1] इति।

---

१. *Alasamodinī*—I-17 (reads इमाः for मता). The *Alasamodinī* is a treatise on poetics written by Kavīndra Gaṅgānanda of Mithilā. It is devoted to a minute and detailed delineation of the types of heroes and heroines and their moods etc. described in Sanskrit poetic and

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र विदग्धा द्विविधा—क्रियाविदग्धा, वाग्विदग्धा च। क्रियाविदग्धा यथा—

कान्ते केलिकलाकुतूहलवति प्रोल्लास्य पद्मं पुरः
साकूतं करजेन खण्डितवति ज्ञातेङ्गिता प्रेयसी।
वक्त्रं वीक्ष्य विहस्य किञ्चिदमलस्विद्यत्कपोलस्थली
कालिन्दीतटसत्तमालविटपासक्तां लतामालिखत् ॥७१॥

वाग्विदग्धा यथा—

अतनुघनवितानालोकनव्यस्तयानं
स्पृहयसि यदि वासायाध्वगाशान्तरस्थः।
सुखय मम विदूरस्थायिकान्तप्रवृत्त्या
विमतपरकदम्बामस्मदम्बा कथञ्चित् ॥७२॥

परलक्षितेऽपि परपुरुषप्रेम्णि यस्यास्त्रासो नास्ति सा लक्षिता। यथा—

भूयः सम्प्रति तर्ज्जयन्ति गुरवो नेह स्थितिः श्लाघ्यते
निन्दन्ति प्रतिवेशिनः श्रुतियुगं सद्यस्तिरोधीयते।
किन्तज्जीवनमालि! भूमिवलये येनार्ज्जितं दुर्य्यशो
भद्रं दुर्य्यशसाऽपि जीवनमिदं वैमुख्यतः प्रेयसि ॥७३॥

गुप्ता त्रिविधा—वृत्तसुरतगोपना, वर्त्तमानसुरतगोपना, वर्त्तिष्यमाणसुरतगोपना च। वर्त्तमानत्वादिकञ्च वर्त्तमानादिदिनसम्बन्धादौपचारिकमवसेयम्। त्रिविधाऽपि यथा—

---

dramatic literature. It has been edited by the present editor and published by Vishveshvaranand Vedic Research Institute in Vishveshvaranand Indological Paper Series—129, September 1964.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यास्यामि नालि ! कुसुमावचयाय मुग्धे !
गुञ्जन्मधुव्रतमिदं विपिनङ्कदापि ।
किं वच्मि पक्वतरबिम्बधिया ममाद्य
दष्टोऽधरः स्पृहयता शुकपुङ्गवेन ॥७४॥

अतिरिरंसया सकलपुरुषानुरागवती कुलटा यथा—

क्रीडन्त्येकजनेन वाञ्छति परं तेनारमन्ती हठा-
दिच्छत्यन्यमियं न गच्छति पुनस्तोषं मनाक् कुत्रचित् ।
अस्या एव यदोपभोगरसिका सर्व्वे जगद्वर्त्तिनो
भूयासुः पुरुषास्तदापि तरला तुष्येदसौ वा न वा ॥७५॥

क्रीडानुकूलमर्थमन्तिकस्थितं परपुरुषं श्रावयन्ती स्वेदादिभिर्य्युक्ता या हृष्यति सा मुदिता यथा—

एताः शर्म्मदनर्म्मदावनभुवः श्यामैकजीवातवो
गुञ्जन्मत्तमधुव्रतावलिवलन्मल्लीसुवल्लीभृतः ।
इत्यावाहनमन्त्रतो मुहुरसावाहूय पुष्पायुधं
स्वेदाम्भःपृषतैः कपोलफलके द्रौणेरिवापूपुजत् ॥७६॥

स्वमध्ये व्याजेन कलहं विधाय कुपिता या सङ्केतमन्दिरं प्रयाति सा रुषिता यथा—

आर्ये निरागसि मयि प्रणयं विधाय
कोपात्सुता तव तनोति विरोधमुच्चैः ।
इत्थन्निगद्य चतुरा प्रतिवेशिवक्त्र-
चन्द्रं निधाय हृदि नाभिगृहं प्रयाति ॥७७॥

अनुशयाना त्रिविधा । वर्तमानसङ्केतस्थानविघट्टनेन, स्वानधिष्ठितसङ्केते प्रियगमनानुमित्या, भाविसंकेतस्थानाभावशङ्कया वा खिद्यमाना। प्रथमा यथा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधिविपिनमियं निकुञ्जमालावहनविसृत्वरवन्यया पपाट ।
मनसि मृगदृशो विवर्द्धिताधिव्यतिकरवल्लिरसौ समुल्ललास ॥७८॥

द्वितीया यथा—

कान्ते कलावति विलासपरे करेण
व्यक्ताशयं वहति केतकसत्प्रसूनम् ।
तत्कण्टकैः किमिति दूरगतैरपीयं
विद्धेव वक्षसि बभूव वधूर्व्विचित्ता ॥ ७९ ॥

तृतीया यथा—

निर्गत्य नाभिगृहतः पुरतो विलोक्य
मा भग्नदेवभवनं भज खेदमालि ! ।
पत्युः पुरीपरिसरे परितो मृगाक्षि !
शीर्य्यत्सुपर्व्वसदनानि समालसन्ति ॥ ८० ॥

वित्तमात्रोपाधिकनिखिलपुरुषानुरागा सामान्या यथा—

उपगतमभिलाषिणं निरीक्ष्य प्रचुरधनं गुणहीनमम्बुजाक्षी ।
परिचितमपि सागरं गुणानां व्ययितवसुं निरकासयत्स्वगेहात् ॥८१॥

सा चेयं सामान्या[१] त्रिविधा—गणिका, रूपाजीवा, विलासिनी[२] चेति ।
यदाह महाराजः—

"आजीवतस्तु गणिका, रूपाजीवा, विलासिनी"[3] चेति ।

तत्र कलाचतुःषष्टिनिपुणा गणिका यथा—

१. B adds च after सामान्या २. B reads विलासिनीति
३. *Sarasvatīkaṇṭhābharaṇa*—V—113ab (p. 568)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गायन्ती स्वरमञ्चित[1]श्रुतिचयं तानैः समं पञ्चमं
नृत्यन्ती विधितो दृढं विदधती रम्भामसम्भावनाम्[2] ।
गीतालीः परिवादिनीमनुपलं संवादयन्ती मुदा
हारं हारमियं मनस्तनुभृतां वाराङ्गना राजते ॥ ८२ ॥

रूपयौवनमात्रोपजीवना रूपाजीवा यथा—

क उत्तमवसुव्ययो भृशमसुव्ययोऽपि प्रियः
सुखाय हरिणीदृशो जगति कीदृशो विस्मयः ।
यदाननरुचः[3] पुरः परिणमद्विधूनां शतं
शतञ्च सरसीरुहां न जनचित्तमारोहति ॥ ८३ ॥

कुट्टमितादीनां कर्त्री विलासिनी यथा—

निधाय मणिमालिकामुरसि सस्मिता भामिनी
दृढं समुपगूहिता निजकराग्रमाधुन्वती ।
ननेति वदति स्मयत्किमपि मन्दमन्दं मनाक्
निषेधकवचोऽपि तत् परिणतं विधीनां शतम् ॥ ८४ ॥

मानरूपगर्व्वप्रेमगर्व्वान्यसम्भोगदुःखरूपोपाधिभेदादपरे चत्वारः स्वकीयाभेदाः परकीयासामान्ययोस्तु त्रय एव, तयोर्म्मानस्य प्राचीनैरवर्णनात् । स्वकीया मानवती यथा—

परालपात्कोपः सुतनु ! तव नैव[4] समुचितो
यतो नास्मत्स्वान्ते कमलमुखि ! कान्ते त्वदितरा ।
यदि त्वं जानीषे तरलतरमेव स्थिरतरं
तदा मामुद्भ्राजद्भुजयुगलपाशेन घटय ॥ ८५ ॥

---

१. A reads—सञ्चित
२. B reads रम्भासमम्भावनाम्
३. B reads— रुचिः
४. B reads मैवं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वकीया रूपगर्व्विता यथा—

पत्रं वीक्ष्य पटीरपङ्करचितं काश्मीरपत्रप्रभं
संव्यानं सितमाकलय्य वपुषि प्रोद्यत्पिशङ्गच्छवि ।
मुक्ता वक्षसि संप्रलक्ष्य परितो रक्ताः सिताभूषण-
प्रीतोऽसौ विमनायते सखि ! मया केनाऽधुनाऽऽराध्यताम् ॥८६॥

स्वकीया प्रेमगर्व्विता यथा—

धन्या भवेत्प्रियतमा भुवि सा नमस्या
यस्याः कलासु विहितासु विविच्य दोषान् ।
ब्रूते गुणानपि पतिस्सखि मत्प्रियस्तु
नास्मत्कलासु कलयत्यपि दूषणानि ॥८७॥

स्वकीया अन्य[1]सम्भोगदुःखिता यथा—

राजद्विलासमृदिताङ्गलतामुदञ्च-
द्व्यक्ताधरस्थरदनव्रणदूयमानाम् ।
प्रातर्व्विलोक्य निभृतं निभृतं सपत्नीं
श्वासाः सरोरुहदृशा गणशो विमुक्ताः ॥८८॥

परकीया रूपगर्व्विता यथा—

हरिपरिचयहेतोर्गेहतो निर्गतां मा-
मट विचर चकोराः कोटिशोऽनुव्रजन्ति ।
सहचरि ! रमणीयाः संविहायाशुवल्ली-
रहह तनुलताम्मे षट्पदा वेष्टयन्ति ॥८९॥

परकीया प्रेमगर्व्विता यथा—

---

१. B reads स्वकीयान्य—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुरुजनगुरुयन्त्रिताक्षमेऽहं
न खलु तमीक्षितुमीक्षणेन भूयः ।
सहचरि ! स तु मां प्रियः प्रपश्यन्
नयननिमेषमपि श्लथीकरोति ॥९०॥

परकीया अन्य[1]सम्भोगखिन्ना यथा—

उद्यत्तन्द्रावलितनयना जृम्भसे दूति ! भूयः
सुप्त्वा नूनं क्वचिदपि मदभ्याशमभ्यागतासि ।
नागास्तस्यान्तिकमयि ! परप्रेयसो मन्दबुद्धे-
रद्धा जल्पस्यनृतमधुना नानुविद्धा ह्रियासि ॥९१॥

सामान्या रूपगर्व्विता यथा—

किमालपामि प्रकटं ममोच्चैर्धनेऽधुना धन्धनमेव धातुः ।
प्रियेण दत्ताः करयोः करेण प्रवालतामाशु वहन्ति मुक्ताः ॥९२॥

सामान्या प्रेमगर्विता यथा—

धन्यास्ता अरविन्दसुन्दरदृशो लब्धस्वभूषाफला
या वक्षोविलसत्स्रजः प्रियतमेनालिङ्गिताः सादरम् ।
स्तोकादन्तरतोऽपि भीरुरसकृद्वक्षःस्थलादुत्क्षिपन्
मुक्ताहारमुरीकरोति दयितो मुक्ताशतम्मे सखि ! ॥९३॥

सामान्या [2]अन्यसम्भोगखिन्ना यथा—

कान्तालयाद्गतवतीं मृदिताङ्गयष्टि-
मुद्यद्गसुव्रजवतीमपरां निरीक्ष्य ।
न प्रापि हा धनमिदं हतया मयेति
वाराङ्गना किमपि दुःखमुरीकरोति ॥९४॥

---

१. B reads परकीयान्य—   २. B reads सामान्यान्य—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र कियतां भेदानामगणनया स्वकीयाभेदास्त्रयोदश प्राचीनैर्गणिता-स्तथा हि—

धैर्याधैर्यतदुभयोपाधिभेदात् मध्याप्रगल्भयोः षड्भेदाः । [न च प्रत्येकं ज्येष्ठाकनिष्ठाभ्यां द्विविधा इति द्वादश मध्याप्रगल्भयोर्भेदाः । मुग्धा त्वेकविधैव । तदुक्तम्—

"मध्या प्रगल्भयोर्भेदा द्वादशात्र प्रकीर्त्तिताः ।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदशे ॥"ति ।

परकीयाया द्वौ भेदौ—परोढा कन्यका चेति । सामान्या त्वेकविधै-वेति षोडशनायिकाभेदाः । प्रत्येकं स्वाधीनभर्तृकाद्यवस्थाभिरष्टाभिरष्टविधा इत्यष्टाविंशत्यधिकं शतं नायिकाभेदाः ।][1] तेऽपि उत्तममध्यमाधमभावात् प्रत्येकं त्रिविधा इति चतुरशीत्यधिका त्रिशती नायिकाभेदानां भवति । तदुक्तम्—

"इति साष्टाविंशतिशतमुत्तममध्यमाधमस्वरूपमतः[2] ।
चतुरधिकाशीतियुतं शतत्रयं नायिकाभिदानां स्यात् ॥"

एतादृशगणनायां स्वतन्त्रेच्छैव प्राचां नियामिकेति द्रष्टव्यम् । स्वाधीन-भर्तृकादयश्च स्वाधीनभर्तृका, खण्डिता, अभिसारिका, कलहान्तरिता, विप्रलब्धा, प्रोषितपतिका, वासकसज्जा, विरहोत्कण्ठिता चेत्यष्टौ गणिताः । तत्र यस्या गुणाकृष्टकान्तोऽन्तिकं न जहाति सा स्वाधीनपतिका । तदुक्तम्—

"कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥" इति ।

१. The portion of the text within brackets is missing in A.
२. A reads सरूपमतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र मुग्धा स्वाधीनपतिका यथा—

चक्षुश्चञ्चलता कदाचिदधुना प्रादुर्भवन्ती हठात्
कान्तं निश्चलमातनोति सुमुखि ! प्रत्यग्र एष क्रमः ।
त्वद्वक्षस्सरसो भविष्यदतुलं कोकद्वयं प्रेयसः
सम्प्रत्येव करोति चित्तसरसीकेलीकलाकौतुकम् ॥९५॥

मध्या स्वाधीनपतिका यथा—

गाढालोकन[1]वाक्प्रपञ्चनिविडाश्लेषैर्व्विना निर्वृतिं
नो चेतस्समुपैति तेषु विहितेषूज्जृम्भतेऽपत्रपा ।
इत्यन्योन्यविरोधजातवहलस्तम्भे मृगाक्ष्या गुणै-
र्ब्बद्धं कान्तमनश्शशाक न पुनर्गन्तुं मनाक् कुत्रचित् ॥९६॥

प्रौढा स्वाधीनपतिका यथा—

तन्वि ! भ्रूयुगसद्विलासवलनैरेवायमास्ते पति-
र्य्यातो निश्चलतां निदेशवशगः किन्दोर्द्वयाबन्धनैः ।
इत्यव्यक्तरहस्यवित्सहचरीवक्रोक्तितो लज्जिता
नम्रास्या विदुषीह सस्मितमुखी वश्या तपस्यावशात् ॥९७॥

परकीया स्वाधीनपतिका यथा—

योऽसौ जातु गवाक्षवीक्षणविधिर्य्यस्सङ्गमो दुर्ल्लभः
कादाचित्क उदासितेन वचसा प्रेम्णोऽपि यद्गोपनम् ।
तेषामेकमपि त्वदीयमचिरात्त्वद्वश्यतासाधनं
सर्व्वं योऽनुबभूव तत्स्ववदने सोऽन्यस्य केनोच्यताम् ॥९८॥

---

१. A reads गाढालिङ्गन—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्या स्वाधीनपतिका यथा—

मुक्ताकाञ्चनपद्मरागशकलान्याहृत्य यत्नादहं
नित्यं तत्परितोषपोषणरतो लिप्से न चान्यामपि ।
विज्ञायेत्थमपि त्वमब्जनयने ! चेद् दुर्ज्जनप्रश्रया-
दौदास्यं भजसेऽतिसेवनपरे तन्मे विरोधी विधिः ॥९९॥

अन्यसम्भोगचिह्नितः प्रियः पार्श्वमेति यस्याः सा खण्डिता । तदुक्तम्—

"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिते ॥"ति ।

तत्र मुग्धा खण्डिता यथा—

वक्षोऽनुलक्ष्य परमुग्धवधूविमुग्ध-
वक्षोरुहाङ्कितमसौ मधुसूदनस्य ।
ऊचे न किञ्चिदमितत्रपया दृगन्त-
मारक्तमद्य शरदिन्दुमुखी चकार ॥ १०० ॥

मध्या खण्डिता यथा—

आलोक्यापरवल्लभापदलसन्मौलिप्रपाताहित--
व्यक्तालक्तकरक्तसक्तमलिकं प्राप्तस्य पत्युः प्रिया ।
उद्यल्लोचनकोणशोणिमवलद्व्रीडाविनम्रानना
निर्य्यत्कोपवचोनिरोधनधियेवास्ये करं प्रार्प्पयत् ॥ १०१ ॥

प्रौढा खण्डिता यथा--

तवालिकेलक्तकरक्तता मामलक्तरक्तां प्रकटी करोति ।
भवद्दृशोः कान्त ! किलालसत्वं प्रकाशयत्यद्य ममालसत्वम् ॥१०२॥

परकीया खण्डिता यथा--

यद्वृद्धयै[1] गुरुभीरुता विदलिता लज्जा मया वर्जिता

---

१. A reads यद्बुद्धयै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मर्य्यादाऽपि विसर्ज्जिता न गणिताः स्वीयायशोराशयः ।
रागः सोऽपि पराङ्गनाकुचतटीकाश्मीरपङ्काङ्कभृद्--
वक्षस्यद्य पुरः प्रिये वरतनोरास्ये परं वर्त्तते ॥ १०३ ॥

सामान्या खण्डिता यथा--

वक्षस्थलं कितव ! ते परवल्लभाया
वक्षोरुहाङ्कितमिदं स्वतएव भाति ।
किं भूषयेति विनिगद्य हठात् प्रियस्य
हारं जहार हृदयाद्धरिणायताक्षी ॥ १०४ ॥

या मन्मथाधीना स्वयमभिसरति प्रियं वाऽभिसारयति साऽभिसारिका । तदुक्तम्--

"अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥" इति ।

तत्र मुग्धाऽभिसारिका यथा---

सखीभिः स्निग्धाभिर्व्विरचितनवाकल्पवलिता
प्रवृत्ताऽसौ प्रेम्णा प्रथममभिसर्त्तुं प्रियतमा ।
हृदि प्रोद्यल्लज्जाजनितजडिमव्यस्तगमना
दधौ शङ्कां दोलाललिततरलीलापरिचयम् ॥१०५॥

मध्याऽभिसारिका यथा---

वेशं विधाय लघु वेश्म निजं विहाय
द्वारं गृहस्य समुपेत्य चिराय पत्युः ।
पद्मानना प्रियतमाऽभिमुखे कथञ्चित्
स्थित्वा लिलेख भुवमङ्गुलिभिः पदस्य ॥१०६॥

प्रौढाऽभिसारिका यथा---

घनीभूता भूषावलिभिरभितः प्रत्यपघनं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनोभूभूमातिव्यतिकरवलन्मेदुरमना: ।
लसल्लीलालिप्सालऌलिततरदोलोपरि[1]गता
प्रियागारं सारातुलजघनभारा चिरमगात् ॥१०७॥

परकीयाऽभिसारिका यथा—

[वनानि प्रासादा भुजगफणमालाः किसलय-
प्रविन्यासा मेघध्वनिरतिगभीरो न भयदः ।
परास्तास्ता नद्यो भुव इव समा नन्दतनयं
समुद्दिश्य प्रेम्णा मम सखि ! गतायाः समभवन् ॥

सामान्याऽभिसारिका यथा—][2]

प्रत्यङ्गसङ्गिवरभूषणभूरिभासा
ज्योत्स्नामयीर्व्विदधती हरितः समन्तात् ।
सौरभ्यसारहृतचञ्चलचञ्चरीक-
मालाऽभिसारसरणिं शरणीचकार ॥१०८॥

ज्योत्स्नाऽभिसारिका यथा—

कर्प्पूरैस्तिलकावलीमरचयद्वासो वसाना सितं
वेणीं केतकपत्रकैरतिरयन्मुक्तावलीमावहत् ।
आगारादथ निर्गता परिगता भृङ्गैश्चलैरुज्झिता
माला माधुकरीति यामिकजनैर्ज्ज्योत्स्नेति चालक्षिता ॥१०९॥

कृष्णाऽभिसारिका यथा—

रचयसि वरपत्रं[3] तन्वि ! कस्तूरिकाभि-
स्तिरयसि वलयालीर्वाससा श्यामलेन ।

---

१. A reads—दोलापरिगता
२. The portion within brackets missing in A
३. B reads परतापं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

फणिगणमणिजालैर्नाहतध्वान्तमाले
पथि सुमुखि ! विदध्याः केन सङ्गोपनानि ॥११०॥

दिवाऽभिसारिका यथा—

यातायामनुरागयुक्तमनसोरन्योन्यमाभाषण-
व्यक्तप्रेमवतोर्म्मिषेण चलतोस्सार्थस्य पश्चात् परम् ।
यङ्कञ्चित्कुसुमौघगुञ्जदलिकं कुञ्जं समागच्छतो-
र्य्यूनोरस्य तरा जयन्ति नितरां निःकैतवाः केलयः ॥१११॥

कुलजाभिसारिका यथा—

मूकीकृत्य विभूषणानि वसनेनाच्छाद्य सम्यक् तनुं
मन्दं मन्दमदात्पदं प्रचलिते पत्रेऽपि शङ्कामगात् ।
विस्फायत्तिमिरे निरस्तनिखिलालोकेषु लोकेषु यत्
कान्तं कान्तमुपैति नीरजमुखी तद्वेद वा न स्मरः ॥११२॥

प्रेष्याऽभिसारिका यथा—

सम्यक् प्रपीतमधुसम्भवदेकमोद-
माद्यन्मनस्समुदयन्मदनोज्ज्वलाङ्गी ।
घूर्णद्विलोलनयना स्खलदुक्तिरेषा
प्रेष्या प्रयाति चपला निजनाथगेहम् ॥११३॥

चाटुकारिण्यपि प्रिये कोपात्कलहं विधाय पश्चात्तापव्याकुला कलहान्त-रिता । तदुक्तम्—

"चाटुकारमपि प्राणनाथं कोपादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥" इति ॥

---

१. B reads यत्किञ्चित्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र मुग्धा कलहान्तरिता यथा--

कान्तश्चाटुपटुः प्रशस्तगुणवान् कोपान्मया मुग्धया
यद्भूयोऽपि तिरस्कृतः कृतमिदं लब्धामृतोपेक्षणम् ।
इत्यालोक्य हृदा निजेन परिषन्मध्ये सखीनां स्थिता
नोचेत्किञ्चिदसौ बभूव सुखितस्वान्तेव कान्तानना ॥ ११४॥

मध्या कलहान्तरिता यथा--

मध्येसखीजनसभं कलहाभिधान-
व्यग्रः स्फुरत्यधर एव विशेषमिच्छन् ।
कण्ठेऽर्गलीभवति कापि कठोरलज्जे-
त्याधीनसौ भवति चित्रितचित्तवृत्तिः ॥ ११५ ॥

प्रौढा कलहान्तरिता यथा--

प्रेयान् शीलपयोनिधिः परिलसच्चाटुक्रियाकौशलः
क्रोधेनान्धितचेतसा सखि ! मयावज्ञानविज्ञः कृतः ।
तन्मामाधिपयोधिमध्यपतितां सन्तारयेस्त्वं तरि-
श्चेदह्नाय दयाविधायिनि तदा वर्त्ते न वर्त्तेऽन्यथा ॥ ११६ ॥

परकीया कलहान्तरिता यथा--

उपहासकथा न मया गणिता कलिता कुलिशावलिसन्तुलिता
खलवागनुरागवलन्मनसा गुरुभीरभितस्तृणवद्दलिता ।
सखि ! यस्य मुदे किल किन्न मया वत सोऽपि तिरस्कृत उद्धतया
हठतो ननु येन[1] वने भवने शयने मम सम्प्रति न स्थिरता ॥ ११७ ॥

सामान्या कलहान्तरिता यथा--

मुक्तां ग्राहयितुं तृणीकृतधनस्सत्प्रेमवल्लीमसा-
वेकां यच्छति कोटिशस्सरभसं मुक्ता अमुक्तद्विषः ।

---

1. A reads हठतोऽनुनयेन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किञ्चास्मन्मुखपद्मरागवशगो यः पद्मरागानदा--
न्मौग्ध्यादेष ऋजुर्म्मया हतधियावज्ञापदं प्रापितः ॥ ११८ ॥

प्रियस्संकेतं कृत्वाऽपि प्रतारणापरस्सन्निधिं यस्या नैति सा विप्रलब्धा। तदुक्तम्—

"प्रियः कृत्वाऽपि संकेतं यस्या नायाति सन्निधिम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥[1]" इति।

तत्र मुग्धा विप्रलब्धा यथा—

प्रेयानन्यपराङ्मुखस्सखि! सदा त्वामेव चित्ते वह—
न्नास्ते सम्प्रति मन्दिरे व्रज जवाद् दृष्ट्वैनमानन्दय।
इत्यालीजनजल्पनोत्सुकमनाः कान्तस्य केलीगृहं
गत्वा शून्यमवेक्ष्य नामितशिरा नोवाच किञ्चित्सखीम् ॥ ११९ ॥

मध्या विप्रलब्धा यथा—

यातायाः कमनीयकेलिभवनं पत्युः समुज्जृम्भतो
विश्वासाच्चतुरालिवर्गवचनोपन्यासविन्यासतः।
शून्यं तत्र विलोक्य कान्तशयनं संवीक्ष्य चालीजनान्
खिन्ना या उदियाय वाचि जडिमा सद्यो दृशोः शोणिमा ॥१२०॥

प्रौढा विप्रलब्धा यथा—

प्रोद्यत्केलिमनोरथैस्सरभसं सम्प्राप्य केलीगृहं
शून्यं वीक्ष्य निरीक्षणेन परितो निर्णीय पत्युश्छलम्।
शय्यां खिन्नमना व्युदस्य सहसा ताम्बूलबीटीचया-
मुत्क्षिप्यालिगणं विनिन्द्य गृहतोऽगच्छत्सरोजेक्षणा ॥१२१॥

---

१. *Sahityadarpaṇa*—III—108 (p. 160)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परकीया[1] विप्रलब्धा यथा—

आगन्तव्यमनेकवल्लिविलसन्मल्लीनिकुञ्जोदरे
सायं सत्यमितीरिता स्मरभिदा गोपाङ्गना काचन ।
गत्वा तत्समये तदेव ललितं कुञ्जोदरं सादरं
कान्तं तत्परितोऽनवेक्ष्य विकला कृत्यं निनिन्दात्मनः ॥१२२॥

सामान्या विप्रलब्धा यथा—

कृत्वासौ समयं स्वयं समुदयत्कामं निकुञ्जोदरं
नायातश्शठ इत्यहो मम महानेष प्रमादोऽभवत् ।
त्यक्त्वा वाचि सदा स्थितं गुणनिधिं स्वल्पार्प्पणादाशया
वित्तानां बहुचित्तविभ्रमकृतां क्रान्तीकृतः कातरः ॥१२३॥

प्रियदूरदेशगमनेन निश्चयद्वारा जनितो यः सन्तापस्तद्वती प्रोषित-पतिका । तदुक्तम्—

"नानाकार्य्यवशाद्यस्या दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्त्ता भवेत्प्रोषितभर्तृका ॥"[2] इति ।

अत्र दूरदेशं गत इत्यत्र गमनस्यातीतत्वं न विवक्षितं, प्रयोजनाभावात् प्रवत्स्यत्पतिकाया अव्यापनाच्च, तदुपादानञ्च मनोभवदुःखे निश्चयद्वारा दूरगमनहेतुकत्वलाभाय, एतेन प्रवत्स्यत्पतिका नवमी नायिकेति केषाञ्चित् प्रलपितमपास्तं, प्रोषितपतिकालक्षणेनैव तदाक्रमणात् । ननु प्रोषितः पतिर्य्यस्या इति विग्रहे निष्पन्नस्य प्रोषितपतिकाशब्दस्यावयवार्था-नुगमः प्रवत्स्यत्पतिकायां नास्ति । अतीतोत्पत्तिकत्वस्य निष्ठार्थत्वात् तस्य तदानीं प्रवासे बाधादिति चेत् । साधु शब्दविद्याभियोगं प्रकाशयसि । कथय तावत् प्रोषितपतिकेति संज्ञा यौगिकी पारिभाषिकी वेति ? यौगिकी

१. परकीया missing in B
२. *Sahityadarpaṇa*—III—109 (p. 161)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति[1] चेत्, विरहोत्कण्ठितायां किमित्यसौ न प्रवर्त्तत इति ब्रूयाः, प्रपूर्व्वस्य वसेर्द्देशान्तरनिवासबोधकत्वात् विरहोत्कण्ठितायाश्च पतिर्न्न देशान्तरे निवसति किन्तु तत्रैव स्थलान्तरे निवसन् कार्य्यतो नायातीति चेत्, स्वेच्छाकल्पितोऽयमर्थो न सचेतसां हृदयमारोहति। आगन्तुं कृतचित्तेऽपि प्रवासिनि पत्यौ दैवादागमनसमुचितेऽपि समयेऽनागते तदनागमदुःखव्याकुला विरहोत्कण्ठितेति विरहोत्कण्ठितालक्षणस्य प्राचीनैरुक्तत्वात्। तत्रैकदेशे स्थलान्तरे वासस्यानिवेशात् असन्निधानवास एव प्रपूर्व्वकवसेरर्थः। यदाह **महाराजः**—

"यत्राङ्गना युवानश्च वसते न वसन्ति च।
स प्रवासः प्रशब्देन प्रतीपार्थेन कथ्यते॥"[2]

अत्र वसत इति वस आच्छादन इति धातोर्न्निष्पन्नं तत्र भूषणानीति कर्म्माध्याहरणीयं वसन्ति सन्निधौ। वसन्ति नेत्युभयत्र सम्बध्यते। तस्मादसन्निधानवास एव प्रवासशब्दार्थः। अतएव,

"विरहाणलो सहिज्जिअ आसाबंधेण वल्लहजणस्स।
एक्कग्गामपवासो माए मरणं विसेसेइ॥"[3]

इति **महाराजः** प्रवासमुदाजहार।

तस्मात् प्रोषितपतिकेति संज्ञा पारिभाषिकीति गृहाण। तस्याश्च नावयवार्थान्वयस्सर्व्वत्रापेक्षितः न च यस्यावयवार्थान्वयः क्वचिद्भवति तस्य सर्व्वत्रैवावयवार्थान्वय इति नियम इति वाच्यम्। कृतमालादिशब्दे नियमभङ्गात्। न चोपलभ्यमानयोगार्थान्वयः शब्दः केवलरूढिमात्र भवितुमर्हतीति वाच्यम्, योगार्थपरिस्फुरणेऽपि केवलरूढेः सद्भावे विरोधा-

---

१. इति missing in B
२. *Sarasvatīkaṇṭhābharaṇa*—V—71 (p. 561)
३. *op. cit.*—V—265 (p. 647)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावात् । यदाह महाराजः—ननु वाच्यपदेऽस्य[1] पूर्वापरविभागाविभिन्नार्थाऽभिधायिनो वृक्षादयः प्रतीयमानभागभेदान्वयाः सम्बन्धिपदार्थोपहितभेदवृत्त्यर्थाभिधायिनः पुनरिमे तत्कथं प्रथमानुरागानन्तरादयो वृक्षादिवद्रूढशब्दा भवितुमर्हन्तीति । तदसत् । रूढिशब्दा यौगिकशब्दा इति हि विभागो भेददर्शनाभ्यामनिविष्टबुद्धेः प्रतिपादनोपाय एव । अयथाभिनिविष्टो ह्ययं क्रमेण तस्मादयथार्थान्निवर्त्तयितव्यः । ततोऽस्याः प्रत्यभिज्ञायमानप्रकृतयः श्रोत्रियक्षेत्रियादयो[2] दर्श्यन्ते । न ह्यत्र प्रकृतिरूपमवसीयते, यतः प्रकृत्यर्थावच्छिन्नः प्रत्ययार्थोऽभिधीयते । ततोऽवसीयमानावयवविभागा रूढयः काश्चिदुपन्यस्यन्ते । यत्रात्यन्तमसम्भवोऽवयवार्थस्य यथा शक्रगोपस्तैलपायिकेति पुनः कदाचित्सन्निहितावयवार्था जातिविशेषाभिधायिनः सप्तपर्ण्णकृतमालादय उदाह्रियन्ते । यतः प्रपलाशोऽप्यनुद्भिन्नपलाशोऽपि च वनस्पतिः सप्त पर्ण्णान्यस्य पर्व्वणि[3] पर्व्वणीति सप्तपर्ण्ण इत्याख्यायते तथा निःकुसुमोऽपि तरुरनारब्धकलिकाजालकोऽपि कृता मालाऽनेनेति कृतमाल इत्यभिधीयते इति तस्माद्योगार्थोपलम्भे केवलरूढिस्वीकारे न किञ्चिद्बाधकमीक्षामहे ।

किञ्च प्रवसत्पतिकापि परा नायिका किमिति नागणि ? प्रोषितपतिकाशब्दयोगार्थानुगमस्य तस्यामप्यभावादिति प्राचीनपरम्पराप्राप्तो विभागो यथास्थित एव स्थापनीय इत्यलं पल्लवेन ।

तत्र मुग्धा प्रोषितपतिका यथा—

पाण्डुर्गण्डतटी पटीरविलसत्पङ्कानुषङ्गं विना-
ऽप्युष्णः श्वासभरोऽधरद्युतिहरो व्यापारशून्यस्थितौ ।
बालाया विरहज्वरं प्रकटयत्यालापगेहोद्यमै-

---

१. अस्य missing in A　　२. B reads—क्षत्रियादयो
३. missing in A

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कान्तप्रश्नसखीकथासु न पुनर्ज्जातो विशेषग्रहः ॥१२४॥

मध्या प्रोषितपतिका यथा—

कस्माद्विनैव घनसाररसेन पाण्डु-
र्गण्डस्थली तव मृगाक्षि ! समीक्ष्यतेऽसौ ।
इत्थं सखीभिरभितः परिपृच्छ्यमाना[1]
निर्य्यन्निरन्तरितबाष्पभरा रराज ॥१२५॥

प्रौढा प्रोषितपतिका यथा—

कर्प्पूरादपि चन्दनादपि सरोजातप्रपातादपि
प्रत्युद्यन्नयनप्रमोदनिपुणस्येन्दोर्म्मयूखादपि ।
नीहारादपि दह्यते वरतनुः[2] प्राणेश्वरे प्रोषिते
यज्जीवत्यमलेक्षणा स सुहृदामेको महानुत्सवः ॥१२६॥

परकीया प्रोषितपतिका यथा—

अधिमधु मधुरं रुतं पिकानामुदितमुदञ्चितपञ्चमप्रपञ्चम् ।
स्तुवति गृहपतौ करेण कण्डूयनमिषतः श्रुतिमेणदृक् पिधत्ते ॥१२७॥

सामान्या प्रोषितपतिका यथा—

प्रेमाणं परिभाव्य चेतसि निजे राजद्वियोगाङ्कतो
रज्यन्ते पुरुषाः कलासु कुशला यच्छन्ति वित्तान्यपि ।
इत्यालोच्य निजप्रियागमदिनं मत्वान्तिके कामिनी
गण्डं पाण्डुमसौ करोति गणशः कर्प्पूरसंलेपनैः ॥१२८॥

प्रियागमं मत्वा मण्डनादिकं या रचयति सा वासकसज्जा । तदुक्तम्—
"कुरुते मण्डनं स्वस्याः सज्जिते वासवेश्मनि ।

---

१. B reads परिगृह्यमाणा २. A reads ह्रीयते तव तनुः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥"[१] इति ।

तत्र मुग्धा वासकसज्जा यथा—

शय्यां सज्जयति प्रमोदजननीश्चन्द्रावदातप्रभां
धूपं दर्प्पकदर्प्पकं रचयति ग्रथ्नाति माल्यं सखी ।
स्थातुं तन्निकटेऽपि हन्त ! सुमुखी सापत्रपा जायते
दूरेकृत्य नियोजनं मृगदृशस्तास्ता विदूरे क्रियाः ॥१२९॥

मध्या वासकसज्जा यथा—

शय्यां सज्जयितुं समुत्सुकमतिर्न्नासज्जयन्मालिकाः
निर्म्मातुं रभसादियेष न पुनर्म्मालयान्यसौ निर्म्ममे ।
इत्थं स्तम्भमवेत्य पक्ष्मलदृशोऽभिप्रायविज्ञा सखी
तत्तत्केलिकलानुकूलमखिलं सम्पाद्य तेने मुदः ॥१३०॥

प्रौढा वासकसज्जा यथा—

आगन्ताद्य कलानिधिर्न्निरुपमः प्रेयानिति प्रोत्सुकाऽ-
लङ्कारन्दधती नवं नवमियन्नो तुष्यति प्रेयसी ।
आधातुं सगुणेऽप्यहो गुणगणान् व्यग्रा न शक्नोति यत्
कर्त्तुंतत्र समाधिमाहितधिया प्रेमाणमालम्बते ॥ १३१ ॥

परकीया वासकसज्जा यथा—

अद्योमात्रतमित्युदीर्य्य वहलालङ्कारविन्यासत-
स्सत्कृत्या[२]ङ्गमतिप्रयत्नवशतो विन्यस्यमाना स्तनौ ।
स्वापोऽस्यां निशि नोचितः किल सहेत्युक्त्वा गुरूनादरा-
दन्यस्मिन् शयने सरोजनयना कान्ताननं ध्यायति ॥ १३२ ॥

---

१. *Sahityadarpaṇa*—III—110 (p. 162, reads यस्याः and साऽसौ)
२. B reads सत्कीर्णा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्या वासकसज्जा यथा—

कर्प्पूरद्रवसेकचित्ररचना ताम्बूलवीटीचय-
प्रत्युद्यच्छयनीयसज्जनवशादुल्लास्य केलीगृहम् ।
मुक्तालीः प्रति चुम्बनं वितरताऽऽगन्तव्यमस्मद्गृहे
नान्येनेत्यलिखत्स्वकीयशयनादारादसौ भित्तिषु ॥ १३३ ॥

आगन्तुं कृतचित्तोऽप्यागमनसमुचितेऽपि समये यस्याः प्रियो दैवान्नायाति सा विरहोत्कण्ठिता । तदुक्तञ्च—

"आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्पतिः[1] ।
तदनागमदुःखार्ता विरहोत्कण्ठिता मता ॥" इति[2] ।

प्रोषितपतिका पत्युर्गमनेन खिन्ना विरहोत्कण्ठिता त्वनागमनेनेत्यनयोर्भेदः । तत्र मुग्धा विरहोत्कण्ठिता यथा—

आगन्तुं समयं विधाय विधितः प्राणप्रियेऽनागते
चित्तेऽस्याः प्रियता जने समुदिता बाधैव वल्लीच्छलात् ।
विष्वग्विस्तृतसान्द्रसन्ततवलल्लज्जावलीवेष्टिता
गाढोद्यद्विनयातिभारमलिना नासौ चकाशे बहिः ॥ १३४ ॥

मध्या विरहोत्कण्ठिता यथा—

नायातः समयं विधाय रमणो दैवादिति व्यग्रया
प्रोक्तः किञ्चिदपि स्वकीयचरिताभिज्ञोऽपि नालीजनः ।
आधिः सोढुमसौ न शक्यत इति द्वेधा भवच्चेतस-
स्सन्धानाय रसायनीकृत इव क्रोडाक्रमो मानसः ॥१३५॥

---

१. A reads चेत् पतिः

२. *Sāhityadarpaṇa*—III—111 (p. 163, reads यत्प्रियः and विरहोत्कण्ठिताऽस्तु सा)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रौढा विरहोत्कण्ठिता यथा—

नायातो दयितो विधाय समयं कार्य्येण केनाप्यसौ
बद्धः सम्प्रति हन्त ! केन[1] समयस्सख्योऽधुनाऽऽनीयताम् ।
कामः प्रौढशरो[2] हिनस्ति नितरां पुष्पाकरः क्लेशकृत्
ज्योत्स्नासङ्गसमुज्ज्वलेयमभितस्सन्तापिनी यामिनी ॥१३६॥

परकीया विरहोत्कण्ठिता यथा—

श्वश्रूः पार्श्वविवर्त्तनेऽपि वहलाशङ्काकरी यातरः
श्वासोच्छ्वासवशादपि प्रतिपलं शङ्काशताधायिकाः ।
नायाते दयिते विधाय समयं दैवात्सरोजेक्षणा
तापं गोपयति स्मरेण जनितं तूष्णीं पृथक् शय्यया ॥१३७॥

सामान्या विरहोत्कण्ठिता यथा—

कान्तो वाचि सदा स्थितो मयि परप्रेम्णा परत्रारतो
नायातः कथमम्ब ! शम्बररिपुः किम्मेदिनीं सञ्जहौ ।
आहोस्विन्मम दैवमेव विषमं सम्प्रत्यसौ यत्प्रियो
मुक्तालीर्म्मणिमालिकाश्च वितरन्नास्मद्गृहं प्राप्तवान् ॥१३८॥

नायिकानायकसंघटनस्य य उपायस्तत्र कुशला दूती । सा च बहुविधा । तदुक्तं साहित्यदर्प्पणे—

"दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारूः शिल्पिन्याद्याः स्वयं तथा ॥"[3] इति ।

तत्र दिङ्मात्रमुदाह्रियते यथा—

अधिमधुरं कृतकृत्यः किमसि हरे ! दलितकुवलयापीडः ।
पीडयति व्रजबालाः कोऽपि परः कुवलयापीडः ॥१३९॥

---

१. B reads केन हन्त २. B reads प्रौढरसो
३. *op. cit.*—III—154cd-155ab (p. 191)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्थं संक्षेपतो निरूपिता नायिकाः ।

अथ नायका निरूप्यन्ते । नायकस्तावच्चतुर्व्विधः धीरोदात्तो धीरोद्धतो धीरललितो धीरप्रशान्तश्चेति । एते च लक्षिताः साहित्यदर्प्पणे ।

"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो[1] धीरोदात्तो दृढव्रतः कथितः ॥"[2]

अविकत्थनो नात्मश्लाघाकरः महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः निगूढमानो विनयच्छन्नगर्व्वः दृढव्रतोऽङ्गीकृतनिर्वाहकः ।

"मायापरः प्रचण्डश्चपलोऽहङ्कारदर्प्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥
निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।
सामान्यगुणैर्भूयान् द्विजादिको धीरशान्तः स्यात् ॥"[3]

एते चत्वारोऽपि दक्षिणधृष्टानुकूलशठभेदात्प्रत्येकं चतुर्द्धेति षोडशनायकभेदाः । दक्षिणादयः साहित्यदर्प्पण एव लक्षिताः ।

"एषु त्वनेकमहिलासमरागो दक्षिणः कथितः ।
कृतागा अपि निश्शङ्कस्तर्ज्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः ॥
अनुकूल एकनिरतः शठोऽयमेकत्र बद्धभावो यः
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ॥"[4]

एते षोडशापि प्रत्येकमुत्तममध्यमाधमत्वेन त्रिविधा इत्यष्टचत्वारिंशन्नायकभेदाः । तदुक्तं साहित्यदर्प्पणे—

"त्रैविध्यात्सर्वेषामुत्तममध्यमाधमत्वेन ।

---

१. A reads—भावो २. *op. cit.*—III—57 (p. 119)
३. *ibid.*—58-59 ४. *ibid.*—60cd—62 (pp. 121-124)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च ॥"[१]

तत्र धीरोदात्तो दक्षिणे यथा—

स्तुवत्येकामन्यां प्रियसहचरीं निन्दति सखी-
जने न प्रोवाच स्फुटमिह किमप्येष दयितः ।
चिरं स्थित्वा तूष्णीं युगपदभितः स्निग्धमनसा
स्फुरन्मल्लीमालाद्वयमुरसि विन्यस्तमकरोत् ॥१४०॥

धीरोदात्तो धृष्टो यथा—

यस्याः प्रोल्लसदङ्गरागललितं वासो वसानो भवान्
यायात्त्वामिह नास्ति वाञ्छितमिति प्रोक्तः स्फुरन्नेत्रया ।
नो चेत्किञ्चिदसौ विहस्य मधुरं प्राणेश्वरः प्रेयसी-
बिम्बौष्ठे विनिधाय लोचनयुगं तस्थौ चिरं चित्रवत् ॥१४१॥

धीरोदात्तोऽनुकूलो यथा—

पाटीरद्रवलेपमम्बुजदलैः शय्यां जलार्द्रामसौ
लोकानां त्रपया वियोगविधुरो नासेवते राघवः ।
अन्यालोकपराङ्मुखो जनकजां चित्रस्थितां नेक्षते
स्वान्तस्तापमहर्निशं तिरयति स्वान्तस्थलज्जापटैः ॥१४२॥

धीरोदात्तः शठो यथा—

गम्भीरः क्षमयायुतः स्थिरतरो वाचा सुधास्फीतया
स्निग्धां प्रेषितवान् विधाय समयं कुञ्जोदरे मत्सखीम् ।
स्वैरं सम्यगमोदयस्त्वमपरां केलीकलाकौशलै-[२]
र्न्यथैषा भवतो गुणव्रजवतो लीला कथं बालवत् ॥१४३॥

---

१. *ibid.*—63 (p. 125, reads एषां च त्रैविध्याद् in the first foot)

२. B reads कौशलम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धीरोद्धतो दक्षिणो यथा—

एताः खञ्जनगर्व्वगञ्जनदृशस्तुल्यानुरागान्मया
दृश्यन्ते तत[1] एव मय्यपि समप्रेमस्पृशस्ता इमाः ।
ये तु स्वप्रियताविशेषविषमाः कान्तासु कान्तास्वमी
भावा एव भुवः प्रियाप्रियवचोविक्षोभवीतोत्सवाः ॥ १४४॥

धीरोद्धतो धृष्टो यथा—

पाणिं मुञ्च विमुञ्च कैतवकथामित्यंशुकेनाहतः
प्राणेशो विहसन् प्रियामनुसरन् प्राह प्रभूतस्पृहः ।
नाहं पङ्कजगर्भगौरि ! कृतवाँस्त्वद्विप्रियाणि प्रिये
नो योग्याः किल मादृशो मृगदृशां हेलाधियो धीधनाः ॥ १४५॥

धीरोद्धतोऽनुकूलो यथा—

नाहं भानुमति ! त्वदन्यरमणीमालोकयं त्वन्मन-
स्तुष्ट्यैवेह भजे प्रसादमभितः किं खिद्यसे भीरुवत् ।
येऽमी भीमधनञ्जयप्रभृतयो वीरायुधीरागिण-
स्तेषामेष विशेषतो मदभरानुन्मूलयामि क्षणात् ॥ १४६ ॥

धीरोद्धतः शठो यथा—

सश्लाघे मयि दुर्लभं तव किमित्युक्त्वोपगूह्य प्रियां
नीवीग्रन्थिमुदस्य सत्वरमसौ कृत्यस्मृतिव्याजतः ।
आगच्छाम्यरमित्युदीर्य्य निरगात्कुञ्जान्तरं दूरत-
स्तत्राप्तामपरां प्रियः प्रियतमां श्लिष्यन्मुदातोषयत् ॥ १४७ ॥

धीरललितो दक्षिणो यथा—

राजन्तां बहिरेव रम्यसरसालापोत्सुका बन्धव-
स्तास्ता घर्म्मघनोदिताः श्रमकृतस्तिष्ठन्तु दूरे क्रियाः ।

---

१. B reads तव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतासामविशेषरागललिता भोगोपभोगस्पृशा
नीयन्तामनिशं मयेह दिवसोन्मेषा निमेषा इव ॥ १४८ ॥

धीरललितो धृष्टो यथा—
पादाग्रे प्रपतन् पदा परिहृतः काकुं वितन्वन् गिरा
गाढं गञ्जित आलिखन् कुचतटीं क्षिप्तो हठाद्धेलया ।
आलिस्मेरमुखस्तथापि कितवस्ताम्बूलवीटीच्छटा-
भव्यं नव्यकरङ्कमङ्कणमसावस्मत्पुरो नीतवान् ॥ १४९ ॥

धीरललितोऽनुकूलो यथा—
सन्ति स्मेरसरोजजित्वरदृशो वामाः कियत्योऽवनौ
किन्ताभिर्म्मम सेयमस्तु सुमुखी मत्सम्मुखी भावभाक् ।
यामन्तर्ह्रदि निधाय नायति वृथा चिन्तातुरः कौतुकान्
मन्ये भूमितलं महेन्द्रसदनादप्युच्चतादुन्नतम् ॥ १५० ॥

धीरललितः शठो यथा—
एकस्याः सुमनोविनोदनतनोरालिख्य पत्रावलीं
रम्यामद्भुतकारिणीं प्रियतमः स्मेराननश्चाटुकृत् ।
अन्यस्यास्तिलकस्रजं विरचयन् भाले विशालेक्षणां
तामेव प्रथमां तदीक्षणकलालीलैकशीलोऽलिखत् ॥ १५१ ॥

धीरप्रशान्तो दक्षिणो यथा—
एतास्तिस्र उदारसारचरितास्तुल्यानुरागस्पृशो
द्वौ हारौ सदृशाविमौ कथमतस्सन्तोषयामि प्रियाः ।
इत्यालोच्य मनाग्वचोविरहितः स्थित्वा स्ववक्षस्थला-
दुत्तार्य्यापरहारमादरमसौ चक्रे समं सुभ्रुवाम् ॥ १५२ ॥

धीरप्रशान्तो धृष्टो यथा—
शय्यायां परिवृत्य खिन्नमनसा सायं मया सुप्तया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीवीग्रन्थिमुपस्पृशन् स कतिधा क्रूरः करेणाहतः ।
नामुञ्चन्ननु मां तथापि कितवः किं कथ्यतां जीयते
धृष्टे धृष्टतयेति यत्सखि ! पुरावादो वृथाख्यायते ॥१५३॥

धीरप्रशान्तोऽनुकूलो यथा—

सन्तप्तो विरहज्वरेण नलिनीं तापापनोदक्षमा-
मप्यन्येति विचिन्तयन् स्पृशति नो[1] नीतामसौ स्वानुगैः ।
पाटीरद्रवसिक्तसुन्दरतनुः कान्तागुणाधीनधीः
कान्तः सम्प्रति वत्सरानिव कथङ्कारन्नयेद्वासरान् ॥१५४॥

धीरप्रशान्तः शठो यथा—

नानादेशकथां विधाय सुतनुं संश्लिष्य गण्डद्वये
सश्लाघं परिचुम्ब्य काञ्चनमयीं काञ्चीमुदस्य क्रमात् ।
लीलापङ्कजमङ्गुलीभिरभितो गूढं विकास्य प्रिया-
मुक्त्वा प्रातरभूदिति प्रियतमामन्यामयासीत्प्रियः[2] ॥१५५॥

एतेषां नर्म्मसचिवश्चतुर्द्धा, पीठमर्द्दो विटश्चेटो विदूषकश्चेति ।

तदुक्तमलसमोदिन्याम्[3]—

"एतेषां नर्म्मसचिवश्चतुर्द्धा परिकीर्त्तितः ।
पीठमर्द्दो निगदितः कुपितस्त्रीप्रसादकः ॥
मनोभवकलाकोटिकोविदो विट उच्यते ।
सन्धानकौशलज्ञाता चेटकः परिकीर्त्तितः ॥
भवेद्देहादिवैकृत्ये हास्यकारी विदूषकः ।"[4]

एते च नाटकादौ द्रष्टव्या इति विस्तारभयादिह नोदाहृताः । इत्थं निरूपिता नायकाः ।

---

१. B omits नो
२. A reads—मयासीत् प्रियः
३. For *Alasamodinī vide supra* pp. 27-28
४. *op. cit.* 48–49 .

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथोद्दीपनविभावा निरूप्यन्ते। स्थायिभावस्य यो निमित्ततया हेतुस्स उद्दीपनविभावः प्रकर्षाधायकस्यापि प्रकृष्टस्थायिभावे निमित्ततैवेति नाऽव्याप्तिः। स च चन्द्रचन्दनरोलम्बरुदितादिभेदेन नानाविधः। तत्र दिङ्मात्रमुदाह्रियते। यथा—

भूयः शीतमयूखदीधितिवलत्पाटीरपङ्कद्रव-
व्यक्तासिक्तनिजोदरो रविसुतारिङ्गत्तरङ्गव्रजैः।
ताम्यत्तापगणः प्रफुल्लकुसुमामोदैरुपागच्छता-
मारादाह्वयतीव मन्मथमसौ कुञ्जोऽलिनां गुञ्जितैः ॥१५६॥

अथानुभावा निरूप्यन्ते। पूर्वोक्तस्य रत्यात्मकस्य स्थायिभावस्य यः कार्य्यः स श्रृङ्गारेऽनुभावः मुखावलोकनगुणकथनादिभेदादनेकधा। सात्त्विकभावा अप्यनुभावा एव, ते चाष्टधा। तदुक्तम्—

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः॥
स्तम्भश्चेष्टाप्रतीघातो भयहर्षामर्षादिभिः।
वपुर्ज्जलोद्‌गमः स्वेदो रतिघर्म्मश्रमादिभिः॥
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया।
मदसम्मदपीडादेर्वैस्वर्य्यं गद्‌गदं विदुः॥
रागद्वेषश्रमादिभ्यः[1] कम्पो गात्रस्य वेपथुः।
विषादमदरोगाद्यैर्वर्ण्णान्यत्वं विवर्ण्णता॥
अश्रु नेत्रोद्भवं वारि दुःखक्रोधप्रहर्षजम्।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः॥"[2]

---

१. B reads भ्रमादि—

२. *Sāhityadarpaṇa*—III—161cd—166ab (pp. 196-200)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ते यथा—

निस्पन्दा क्षणमाप्तगण्डयुगलस्वेदाऽथ रोमाञ्चिता
पाण्डुः साश्रुविलोचनाऽथ जनितोत्कम्पाऽथ नीला मनाक् ।
गोपी काऽपि सगद्‌गदं सहचरीं वंशीरवं शृण्वती
दृष्ट्वा प्राह वने घने विषमयी लग्नेह काचिल्लता ॥ १५७ ॥

अत्र स्त्रीणामलङ्कारा निरूप्यन्ते । ते चाष्टाविंशतिः । तदुक्तं साहित्यदर्पणे—

"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥
शोभाकान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता ।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ॥
लीला विलासो विच्छित्तिर्ब्बिब्बोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विकृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ॥
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ।"[1] इति ।

एतेषु भावादयस्त्रयोऽङ्गजा लीलाद्या अष्टादश स्वभावजाश्चालङ्कारा अनुभावा एव । तदुक्तं तत्रैव—

"उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः ।
तद्रूपास्सात्त्विका भावास्तथा चेष्टाः परा अपि ॥"[2] इति ।

तद्रूपा इत्यनुभावस्वरूपा इत्यर्थः । अत्र भावाद्यास्त्रयः पूर्वमेवोदाहृता लक्षिताश्च । शोभा तु यौवनादिजनिताङ्गानां शोभा । यथा—

१. *op. cit.*—III—114—118ab (p. 169)
२. *ibid.* 159cd—106ab (p. 195)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वयसा कमनीयकेन केनाप्युपगूढोचितकान्तिनालका ।
सुहृदात्मज सरोरुहाक्षी शुशुभेऽसौ मधुनेव माधवी ॥ १५८ ॥

मन्मथोन्मेषविस्तीर्णा शोभैव कान्तिः । यथा—

चक्षुर्य्युगेन खलु खञ्जनगञ्जनेन
वक्त्रेण शारदसुधानिधिनिन्दकेन ॥
स्वर्ण्णाचलप्रणयकारिकुचद्वयेन
दासीकरोति तरुणी तरुणानशेषान् ॥१५९॥

अतिविस्तीर्ण्णा कान्तिरेव दीप्तिः । यथा—

सरस्वानेतस्याः प्रचुरतरलावण्यपयस-
स्तनुस्तत्र प्रेमासमरुचिरमुक्तामभिलषन् ।
निमज्ज्यान्तं नागादथ सभयमुन्मज्ज्य सहसा
न पारं नावारं कलयति मनो धीवरविटः ॥१६०॥

सर्व्वास्ववस्थासु रमणीयता माधुर्य्यम् । यथा—

न वेणीविन्यासो न च वपुषि भूषाविरचना
न वीटीरागोऽपि स्फुरति रसर[1]स्याधरपुटे ।
तनुस्तन्वी पाण्डुः किमपि भजते संशयपदं
तथाप्येषाऽऽनन्दं दृशि मुहुरमन्दं जनयति ॥१६१॥

निःसाध्वसत्वं प्रगल्भता । यथा—

सरभसमनुचुम्ब्य गण्डपालीं
पुलकवति स्तनयुग्ममानिधाय[2] ।
उरसि नवरसस्पृशोऽभिरामा
कमपि जनं सुदृशो विनोदयन्ति[3] ॥१६२॥

---

१. A reads रसस्या—
२. B reads—मोविधाय
३. A reads विनोदयति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्व्वदा विनय औदार्य्यम् । यथा—

अन्यालक्तकरक्तभालमभितः स्वेदाम्बुसीदत्तनुं
मामुद्वीक्ष्य समीपगामिनमतिश्रान्तोऽसि कान्तेति सा ।
स्मेरास्या सुमुखी निगद्य सरसं चेलाञ्चलेन द्रुतं
भूयो वीजयतिस्म यत्कथमिदं मन्मानसं विस्मरेत् ॥१६३॥

आत्मश्लाघारहिताऽचञ्चला मनोवृत्तिर्धैर्य्यम् । यथा—

प्रकोपात्पञ्चेषुः प्रहरति मुहुः प्रत्यपघनं
महानेष प्रौढो मनसि भृशमाधिः प्रसरति ।
तथापि क्षुभ्यन्तीमिह सहचरीमप्यनुचरीं
स्मितस्फीतेनैषाऽऽलपति वचसाऽऽनन्दयति च ॥१६४॥

प्रेमकृता प्रियानुकृतिर्लीला । यथा—

कुञ्जे क्वापि निधाय चारु मुकुटं मौलौ वसाना समं
वासः पीतमपीतचन्द्रकचलच्चूडाधरा राधिका ।
कालिन्दीपयसीह मज्जनकृतां गोपीजनानां जवा-
दादायांशुकजालमाकुलतरा प्राप प्रियस्यान्तिकम् ॥ १६५ ॥

स्थानासनयानादीनां मुखनेत्रादिकर्म्मणां वा य इष्टदर्शनजनितो विशेषः स विलासः । यथा—

समायातं प्राणप्रियमतनुमुद्वीक्ष्य सहसा
गृहद्वारे लग्ना रससरसि मग्ना सुवदना ।
पटप्रान्ते कान्ते विततमिदमोदं विदधती
रतीशस्यादेशान्नयनमतिवेलं नटयति ॥ १६६ ॥

स्वल्पोऽप्याकल्परचनाकान्तिपोषिका विच्छित्तिः । यथा—

रचितां नवमालिकाप्रसूनैरुरसीयं नवमालिकां दधाना ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हरितातुल[1] चोलकं वसाना न समा नालमलङ्क्रियाविशेषः ॥१६७॥

इष्टेऽपि वस्तुन्यतिगर्व्वेणानादरो बिब्बोकः । यथा—

हरिणा हरिणातिचञ्चलाक्षी रसरीतेरनुभाषिताऽपि राधा ।
सुदृढप्रियताऽभिमानमग्ना सुविमग्ना पुनरालिमालल्लाप ॥ १६८ ॥

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनां प्रियसङ्गमजातहर्षात् साङ्कर्य्यं किलकिञ्चितम् । यथा—

क्षणं वितनुते स्मितं क्षणमकारणं रोदिति
क्षणं हसति निर्भयं क्षणमसंशयं त्रस्यति ।
क्षणं मनसि कुप्यति क्षणमसौ पुनस्तुष्यति
प्रतिक्षणविलक्षणा प्रियरते सरोजेक्षणा ॥ १६९ ॥

कान्तकथारम्भे प्रच्छन्नान्यव्यापारवैमुख्यसंपादनाय यत्कर्ण्णकण्डूयनादिकं क्रियते तन्मोट्टायितम् । यथा —

कथारम्भे पत्युः प्रसरति महानन्दनिचये
दृशं हृद्ये सद्यो दिशति गृहकृत्यं गुरुजने ।
क्षणं निष्पन्दाऽभूदथ वितनुते हस्तकमल-
स्फुरन्नालेनैषा श्रवणपुटकण्डूयनविधिम् ॥१७०॥

स्तनाधरादीनां ग्रहणे हर्षेऽपि सति यत्सम्भ्रमान्नेति वचनं शिरःकर-[2] विधूननं वा तत् कुट्टमितम् । यथा—

दष्टेऽधरपुटे मन्दं नेति यद्वदति प्रिया ।
स निषेधोऽपि सन्नित्यविधेरेव प्रवर्त्तते ॥१७१॥

दयितागमनादौ त्वरया भूषणादीनामस्थानविन्यासो विभ्रमः । यथा—

काञ्ची वक्षसि काञ्चनी कथमसौ श्रोणीगतैकावली

---

१. B reads हलितातुल

२. A reads शिरः कम्प—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केयूरं वलयस्थले विनिहितं केनेति जातस्मिते ।
पृच्छत्यम्बुजलोचने दृढतरप्रेमाधिका राधिका
नोचे किञ्चिदतित्रपात्तरलया वंशीमपश्यद् दृशा ॥१७२॥

सुकुमारतयाऽऽङ्गानां मन्दमन्दपदन्यासादि ललितम् । यथा—

सुवर्णमणिमौक्तिकैः कथमसौ तनुः कोमला
कलावति ! विभूष्यतां रचय कौसुमं भूषणम् ।
इति प्रियसखीजनैः कुसुममण्डिता कामिनी
स्वकेलिभवनं रसात् किमपि मन्दमन्दं ययौ ॥१७३॥

यौवनसौभाग्याद्यवलेपजनितो विकारो मदः । यथा—

प्रयत्नशतसम्भृतं न खलु भूषणं भूषणं
निजे वपुषि मन्यते तदनुमन्यतेऽसीमभाः ।
तथापि हरिणीदृशा सहचरीभृशावेशतः
कदाचिदुपकल्प्यते विविधभूरिभूषाविधिः ॥१७४॥

वक्तव्यकालेऽपि व्रीडयाऽवचनं विकृतम् । यथा—

विधाय मणिनूपुरे चरणयोः सरोजानने
सदैतदनुषङ्गतो दयितकुण्डले मण्डय ।
इति प्रियवयस्यया मुहुरुदीरिता राधिका
जघान सरसीरुहा न च जगाद किञ्चित्सखीम् ॥१७५॥

प्रियविश्लेषे स्मरावेगजनिता चेष्टा तपनम् । यथा—

दधाति नलिनीदलान्युरसि सन्ततं खिद्यते
मुहुः श्वसिति वेपते स्मरति चेतसि त्वद्गुणान् ।
त्वदीयविरहानले निपतिता वराकी कथं
विना तव रसोदयं सदयवीक्षणं जीवतु ॥१७६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विज्ञातस्यापि वस्तुनोऽज्ञानादिव वल्लभस्य पुरः पृच्छा मौग्ध्यम् । यथा—

किन्ते वक्षसि भात्यदः पदमिदं कस्याग्रजन्मस्पृशः[1]
कोऽयं[2] तेऽग्रभवाभिलाषमभजन्मुग्धे ! न हि ब्रह्मभूः ।
यामालोक्य स कामुको विधिरभूत्तस्यां किमासीत्तथे-
त्येवं सिन्धुभुवा विधूतवचनो दामोदरः पातु वः ॥१७७॥

वृथा विष्वग्विलोकनं विभूषणार्द्धरचनम् ईषद्रहस्यवचनं च[3] दयितान्तिके विक्षेपः । यथा—

एकत्र श्रवणे दधाति रुचिरं ताटङ्कमेकं भुजे
केयूरं कुरुते निबद्धमकरोन्मञ्जीरमेकं पदे ।
प्राणेशस्य पुरःस्थिता प्रियतमा विष्वङ्मुहुर्वीक्षते
स्वल्पं स्वल्पमसौ रहस्यमसमं वृत्तं निजं जल्पति ॥१७८॥

रम्यवस्तुविलोकनाय लोलता कुतूहलम् । यथा—

समुल्लसितचन्द्रकं शिरसि वेणुसंवादनं
स्फुरत्करयुगं मुदा कमपि[4] वल्लवं वीक्षितुम् ।
कदम्बनिकटे ततो वटतटे कदाचित्स्वयं
कुतोऽपि कृतकैतवाद् भ्रमति राधिका[5]ऽऽराधिका ॥१७९॥

यौवनोद्भेदजनितो वृथा हासो हसितम् । यथा—

कपोले पुलकोल्लासि हसन्ती वामलोचना ।
प्रयच्छति समासङ्गरसन्तीव्रतपस्यया ॥१८०॥

प्रियान्तिके कुतोऽपि भयसम्प्राप्तिश्चकितम् । यथा—

कलिन्दतनयातटे पुनरपि स्फुटं कालियो

---

१. B reads—स्पृहः २. B reads केयं
३. B reads वचनस्य ४. A and B read किमपि
५. B reads साराधिका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषं वमति कौतुकादिति सखीजने जल्पति ।
लतालयमधिश्रिता सभयमुल्लसद्वेपथु-
त्रना झटिति राधिका कमपि वल्लवं श्लिष्यति ॥१८१॥

विहारे कान्तेन सह क्रीडा केलिः । यथा—

परागपरिपिञ्जरं वदनमम्बुजं वाससा
समुज्ज्वलयितुं मुहुर्विहितयत्नमुच्चैरपि ।
पिशङ्गमनुपङ्कतो विदधतं विहस्य द्रुतं
जघान मृगलोचना कुसुमकन्दुकैरच्युतम् ॥१८२॥

इत्थं निरूपिता अनुभावाः ।

अथ व्यभिचारिभावा निरूप्यन्ते । स्थायिभावस्यानुभावरूपे कार्य्ये जननीये सहकारिनिर्व्वेदादयस्ते व्यभिचारिभावाः । तथा च स्थायिभावसहकारित्वे सति निर्व्वेदाद्यन्यतमत्वं लक्षणं फलितं, स्थायिभावासहकारिण्यध्वश्रमादिजनितालस्यादावतिप्रसङ्गवारणाय सत्यन्तं मनोयोगादावतिप्रसङ्गवारणाय विशेष्यदलम् । काव्यानारूढे व्यभिचारिव्यवहाराभावात् काव्यरूढत्वमपि विशेषणं देयम् । यत्तु नानारसव्याप्यत्वं व्यभिचारिभावत्वमिति भानुदत्तमिश्रा अप्यवदन्, तच्चिन्त्यं, प्रत्येकं स्मृत्यादीनां भिन्नत्वेन नानारसव्याप्यत्वाभावात् । व्यभिचारिभावकरूपावच्छिन्ने नानारसव्याप्यताऽस्तीतिचेत्, न, रोमाञ्चादावतिप्रसङ्गात् । तत्रेष्टापत्तौ प्राचां व्यभिचारिषु तद्गणनन्यूनताया अनिराकरणात् । स्वातन्त्र्ये च सर्व्वविप्लवप्रसङ्गात् । किञ्च किमिदं व्याप्यत्वं नाम ? अविनाभावश्चेत्, तदा प्रत्येकं सकलरसव्यभिचारिणां तदसम्भवः । ननु व्याप्यत्वमत्र सम्बन्ध एव, स च सहकारिता रसपदेन च स्थायिभाव उच्यते । दृश्यते च सम्बन्धमात्रेऽपि व्याप्तिवाचकशब्दप्रयोगः । यथा 'अभिधेयाविनाभूतप्रतीतिर्ल्लक्षणोच्यते' इतीति चेत्, न, मनोयोगादावतिप्रसङ्गात्, नानापदव्यर्थतापत्तेश्चेत्यलमसदावेशेन ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निर्व्वेदादयस्त्रयस्त्रिंशत् । तथा चोक्तं साहित्यदर्प्पणे —

"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्म्मग्नास्त्रयस्त्रिंशदुदाहृताः ॥
निर्व्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्व्वा मरणमलसताऽमर्षनिद्राऽवहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जाः
हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्तावितर्क्काः ॥"[1] इति ।

शृङ्गारे

"त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः ।" [2]इत्युक्तं साहित्यदर्प्पणे । "आलस्यौग्र्यजुगुप्साः सम्भोगवर्ज्याः ।" इत्युक्तं रसतरङ्गिण्याम् । वस्तुतस्तु सम्भोगेऽपि रतिश्रमजनितालस्यस्य सम्भवात्, मानविप्रलम्भे प्रगल्भाया अधीराया उग्रतायाः कविभिरुपवर्ण्णनात्, करुणविप्रलम्भे मरणस्यापि वर्ण्णितत्वाच्च जुगुप्सामात्रं वर्ज्ज्यमिति ज्यायः प्रतिभाति ।

तत्र तत्त्वज्ञानेष्टविरहेर्ष्यादिजनितं स्वावमाननं संसारासारत्वज्ञानं वा निर्व्वेदः । तत्र तत्त्वज्ञानोद्भवः शान्ते स्थायी, इष्टविरहादिजनितस्तु व्यभिचारीति विवेकः ।

आवेगस्तु विलक्षणा चित्तवृत्तिर्य्या सम्भ्रमशब्देनोच्यते[3] । तत्कारणञ्च क्वचिद्धर्षातिशयोपनिपातः क्वचिदनर्थातिशयोपनिपातश्च[4] । यत्तु "अनर्थातिशयजनिता सम्भ्रमाख्या चित्तवृत्तिरावेग"[5] इति जगन्नाथपण्डिता अवदन् ।

---

१. *op. cit.*—III—166cd—168 (pp. 201-202)
२. *ibid.* 213ab (p. 237)   ३. B reads शब्देनाभिधीयते
४. क्वचिदनर्थातिशयोपनिपातश्च missing in B.
५. *Rasagaṅgādhara*—p. 113 (reads चित्तस्य सम्भ्रमाख्या वृत्तिरावेगः)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तन्न। हर्षातिशयेनापि सम्भ्रमस्य दर्शनात्। अतएव, "आवेगस्सम्भ्रमस्तत्र हर्षजे पिण्डिताङ्गते"[१]ति साहित्यदर्प्पणे उक्तम्[२]।

दुःखादिजन्यमनौजस्यं दैन्यम्। अनौजस्यं तेजोहानिः।

एतत्त्रयं यथा—

कान्तेनाद्य गमिष्यतेति निकटे मेघागमो दुस्तरः
किं कुर्य्यामुपयामि कञ्चशरणं धिङ्[३]माञ्च या जीवति।
इत्युद्यन्निजचित्तवृत्तिविकला काचित्कुरङ्गेक्षणा
पाणिभ्यां दयितानुकम्पितसखी पादाम्बुजं सेवते॥ १८३॥

रत्यध्वगत्यादिजनितः खेदविशेषः श्रमः। यथा—

निधाय मदुरस्थले कुचयुगं कुरङ्गेक्षणा
मुहुः श्वसिति सौरभप्रसरवर्द्धितानन्यजा[४]।
भृशं समुपगूहिता पुनरपि प्रमोदान्मया
मनागपि न चेष्टते त्यजति नैव निद्रामपि॥१८४॥

मद्योपयोग[५]जनितश्चित्तस्योल्लासविशेषो मदः। यथा—

वितर चारुविलोलविलोचने! स्वयमये! परिरम्भरसायनम्।
भवतु या शिथिला जनजायते हिहृदयं भिभृशं विविवेपते[६]॥१८५॥

करणीयार्थप्रतिपत्तिराहित्यं जडता। यथा—

भित्तौ लग्ना हिमचयमुचो नीरधारागृहस्य
स्निग्धालीभिः प्रथममसमं चित्रमित्येव दृष्टा।
पश्चात्तन्वी कमपि विलसद्वारिवेश्मोपतापं
तापं मत्वा विततमभितः प्रत्यभिज्ञायतेस्म॥१८६॥

---

१. *op. cit*. III—170ab (p. 204)
२. उक्तम् missing in B
३. B reads धिग्
४. B reads नान्यजा
५. A reads मद्योपभोग—
६. A reads विववेपते while B ववेपते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उग्रता चण्डत्वम्, तच्च अधिक्षेपापमानादिजनिता किमस्य करोमीत्याकारा चित्तवृत्तिः। सा च शृङ्गारे न व्यभिचारितामापद्यत इति प्राचां मतम्, अतो नोदाह्रियते। यदि चात्रापि समुद्भवति, तदेदमुदाहरणम्—

दृष्ट्वा कौस्तुभमध्यगां[1] निजतनुं काऽन्या तवोरस्थले
सम्प्रत्यावसतीति सिन्धुसुतया हारेण बद्धो हरिः।
स्वां मूर्त्तिम्मुकुरे विलोक्य कथयेत्यस्याहिते दर्प्पणे
वीक्ष्य स्वाकृतिमुद्गतत्रपहृदोन्मुच्यानयाऽऽलिङ्गितः॥१८७॥

मोहो विचित्तता, सा च तत्त्वानवधारिणी चित्तवृत्तिः। यथा—

दयितप्रहितस्वस्तिसुखाक्षरमदृष्टवत्।
वीक्षते बहुशः प्रेमपरीक्षितमपि क्षणम्॥१८८॥

निद्रानाशोत्तरजायमानो बोधो विबोधः। यथा—

कृतमन्यगवेषणेन निद्रे! दयया देवि! पुनर्म्मयि प्रसीद।
स्मितचारु समालपन् मुकुन्दः सुचिराद्य दृशोरशोकदोऽभूत्॥१८९॥

निद्रामुपेतस्य विषयानुभवः स्वप्नः। यथा—

निमीलितविलोचना पतिकरोपधानाऽभितो
निजारचितकोपिकाऽप्यलघुगोपिका जल्पति।
विनिन्दति सखीजनो गुरुमनो भृशं दूयते
जहीहि वसनाञ्चलं चपल! चञ्चलाऽहं किमु॥१९०॥

वियोगशोकभयजुगुप्सादिजनितो व्याधिविशेषोऽपस्मारः। यथा—

वेपते पतति भूतले भुजं किञ्च विक्षिपति निःश्वसित्यपि।
जीवनेऽपि भजतेऽथ संशयं त्वद्वियोगविकला कलावती॥१९१॥

रूपातिशयादिप्रयुक्तं निजोत्कर्षज्ञानं गर्व्वः।

---

१. B reads— मध्यमां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तादृशज्ञानप्रयुक्तपरा[1]वहेलनं गर्व्व [2]इति जगन्नाथपण्डितानां वचनमनादेयं, परावहेलनस्य गर्व्वकार्य्यत्वात् ।

तथा चोक्तं साहित्यदर्प्पणे--

"गर्व्वो मदः प्रभावश्रीविद्यासत्कुलताऽऽदिजः ।
अवज्ञा[3]सविलासाङ्गदर्शनाविनयादिकृत् ॥"[4]

स यथा--

पत्रं वीक्ष्य पटीरपङ्करचितं काश्मीरपत्रप्रभं
संव्यानं सितमाकलय्य वपुषि प्रोद्यत्पिशङ्गच्छवि ।
मुक्ता वक्षसि संप्रलक्ष्य परितो रक्ता स्मिता भूषण-
प्रीतोऽसौ विमनायते सखि ! मया केनाऽधुनाऽऽराध्यताम् ॥१९१॥

प्राणवियोगो मरणं, तच्चामङ्गलत्वान्नोदाह्रियते । जगन्नाथपण्डितास्तु "रोगादिजन्या मूर्च्छारूपा मरणप्रागवस्था मरणम् । न चात्र प्राणवियोगात्मकं मुख्यम्मरणमुचितं ग्रहीतुं, चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः, भावेषु च सर्व्वेषु कार्य्यसहवर्त्तितया शरीरप्राणसंयोगस्य हेतुत्वादि" ति[5] प्राहुः ।

श्रमादिजनितक्रियावैलक्ष्यमालस्यम् । यथा--

समुत्सुकमतावालिवर्गे खेलाविधौ रसात् ।
नैषा रचयति क्रीडां भूयो भूयो विजृम्भते ॥१९३॥

परापराधजनितो वाक्पारुष्यादिकारणीभूतः चित्तवृत्तिविशेषोऽमर्षः । "क्रोधामर्षयोर्व्विषयतावैलक्षण्यप्रयुक्तो भेदो विषयतावैलक्षण्ये च परविनाश-

---

१. A reads प्रयुक्तापरा—
२. Cf. 'रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः'—*Rasagaṅgādhara*—p. 104
३. B reads अविद्या ४. *op. cit.*—III—181 (p. 212)
५. *Rasagaṅgādhara*—p. 110

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृत्तिपरुषवचनादिरूपकार्य्यवैलक्षण्यमेव गमकमि"[1]ति जगन्नाथपण्डिताः। वैजात्यमेव भेदकमिति तु वस्तुगतिः। स यथा—

किंतव ! कुरु कथाभिः कौतुकं मत्पुरस्तात्
प्रकटय मयि सम्यक् सौहृदं साधुवृत्तेः।
उपल इव रसेन व्यक्तमार्द्रीकृतोऽपि
त्यजसि न कठिनत्वं नाथ ! युक्तं तवैतत् ॥१९४॥

श्रमादिप्रयोज्यं चेतोनिमीलनं निद्रा। यथा—

दृष्टविस्खलितचेलकुचेन श्वासवासविलसन्मदनेन।
गाढमप्यतिरसादुपगूढा न प्रबोधमचिरादधिरूढा[2] ॥१९५॥

लज्जादिभिर्न्निमित्तैर्हर्षाद्याकारगोपनमवहित्था। यथा—

समीपे कालिन्द्याः कमपि कमनीयं मुररिपो-
र्म्मुदा वंशीनादं श्रवणपुटपेयं विदधती।
दधाना कम्पालीमधिकहिम(प)य ✕ पातजनिता-
मवोचद्धेमन्ते तपनतनुजायाः शिशिरताम् ॥१९६॥

औत्सुक्यं कालक्षेपासहिष्णुता। यथा—

गतवति गृहमध्यादालिवर्गे निगूढं
स्मितवति रतिरोतिप्रेक्षणोत्के मृगाक्षी।
व्यजनपवनयोगादाशु निर्व्वाप्य दीपं
हरति रमणनिद्रां पाणिनिष्पीडनेन ॥१९७॥

---

१. Cf. "ननु क्रोधामर्षयोः स्थायिसंचारिणोर्भवियोः किं भेदकमिति चेत्, विषयतावैलक्षण्यमेवेति गृहाण। तत्र तु गमकं झटिति परविनाशादौ प्रवृत्तिर्वंचनवैमुख्यादिकं चेति कार्यवैलक्षण्यम्।" *Rasagaṅgādhara*—p. 108.

२. A reads—दुपगूढा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चित्तस्य भ्रम उन्मादः। यथा—

वृन्दारण्यसमीरधीर ! भवतो नत्वा पदं प्रार्थये
दृष्ट्वैवाहरतो मनो मुरभिदः क्षेमं क्षणं ब्रूहि मे।
भ्रातः ! किञ्च निवेदय स्वयमितो गत्वाऽऽशु तस्यान्तिके
चित्तेनादधती भवन्तमबला जीवेन्न जीवेदपि ॥१९८॥

अनिष्टसंशयः शङ्का। यथा—

निर्गत्य नाभिगृहतः पुरतो विलोक्य
मा भग्नदेवभवनं भज खेदमालि।
पत्युः पुरीपरिसरे परितो मृगाक्षी
शीर्य्यत्सुपर्व्वसदनानि समालपन्ति ॥१९९॥

पूर्व्वानुभूतार्थविषयकं ज्ञानं स्मृतिः। यथा—

नीलाम्भोदं वियति विषमालोकमालोकयन्त्याः
स्मृत्यारूढस्सकृदपि परं वीक्षितो नन्दसूनुः।
चेतश्चण्डोपलमिव बलादेव पीयूषधामा
द्रावं द्रावं नयनशिरयाचारयद् वारिपूरान् ॥२००॥

नीतिमार्गस्मृत्यादिजनितमर्थनिर्द्धारणं मतिः। यथा—

असंशयं सा मिथिलावनीभूर्म्मनो मदीयं वशयिष्यतीति।
तथापि देवैरपि वन्दनीयस्समीहितेऽदो भगवान्मुनीशः ॥२०१॥

रोगजनितो मनस्तापो व्याधिः। चित्तवृत्तिरूपतासम्पादनाय मनस्ताप-पर्य्यन्तानुसरणम्। स यथा—

शक्ता गन्तुं क्वचिदपि न सा नेक्षिता शय्यिकाया-
मित्यावेगादहह चतुरा कापि तस्या वयस्या।
मल्लीमालाः सपदि शयने न्यस्य दाहादमूषां
सप्राणायास्सरसिजदृशो निश्चिकायाथ कायम् ॥२०२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भयावहवस्तुदर्शनादिजन्यः स्वल्पानर्थविषयकः चित्तवृत्तिविशेषस्त्रासः । परमानर्थविषयकस्तु भयमिति भयत्रासयोर्व्विशेषमाहुः । स यथा—

शून्यं केलिगृहं व्रजालि ! विविधान्यालोकय स्वेच्छया
चित्राणीति करे करेण कलिता नीता सखीनाङ्गणैः ।
तत्रच्छन्नमुदीक्ष्य कान्तमचिरादीषद्विहस्योल्लसत्
सभ्रूभङ्गनिवारितालिनिवहा गेहादयासीद्बहिः ॥२०३॥

वदनानमनादिकारणीभूतः चित्तवृत्तिविशेषो व्रीडा । यथा—

वेशं विधाय लघुवेश्म निजं विहाय
द्वारं गृहस्य समुपेत्य चिराय पत्युः ।
पद्मानना प्रियतमाभिमुखे कथञ्चित्
स्थित्वा लिलेख भुवमङ्गुलिभिः पदस्य ॥२०४॥

इष्टावाप्तिजनितो मनःप्रमोदो हर्षः । यथा—

निजभवनपतिः प्रवासमैच्छन्नगर इहोपपतिः स्थिरो बभूव ॥
बहिरियमसुखं प्रकाशयन्ती हृदि हरिणायतलोचना जहास ॥२०५॥

अन्यगुणासहिष्णुताऽसूया । यथा—

अपूर्वा रुचिरेतस्या इति जल्पति वल्लभे ।
प्राह प्रियेयं सामान्या यौवनारम्भसम्भवा ॥२०६॥

इष्टासिद्ध्यादिजनितो मनस्तापो विषादः । यथा—

विरम भृशमनल्पाकल्पतो भव्यभूषा-
वलिघटनमिदानीं खेदमन्तस्तनोति ।
त्वमपि सखि ! मदर्थे खिद्यमानाऽसि भूयो
न हि विधिरनुकूलः किंविधेयं विधेयम् ॥२०७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानादिजनिता सम्पूर्णस्पृहता धृतिः। यथा--

न प्रिया[1] मुररिपोर्म्मम नेयं किञ्च निष्फलतरा तनुरालि ! ।
किन्तु निर्म्मलतरं कुलमेकं रक्षणीयमकलङ्कमशङ्कम् ॥२०८॥

रागादिजनिता चित्तस्यास्थिरता चपलता। यथा—

क्रमेण रसलीलया सुभग ! भावलोलं मनो
विनोदय शनैः शनैरधिकचापलं मा रच।
नवीननवमल्लिकाकुसुमनिर्म्मिता मालिका
मृदुव्यवहृतेः परं रचयति प्रमोदावली ॥२०९॥

रत्यायासादिजनिता निष्प्राणता ग्लानिः, सर्व्वेषां भावानां चित्तवृत्त्यात्मकत्वात्। किन्तु, "बलहानिजनितो दुःखविशेषो ग्लानिरि"ति प्राहुः। सा यथा—

प्रातर्गेहागतवति निजे प्रेयसि प्रेयसीयं
स्रस्तव्यस्तावलितवसना धीयमानोपधाना।
आदातुं न प्रभवति सखीनीतमादर्शमारात्
पश्यत्यन्तर्ल्लुलितनयना मङ्गलाचारचेताः ॥ २१० ॥

इष्टाप्राप्त्यादिजनितध्यानं चिन्ता। यथा–

प्रविततगुणसिन्धोरिद्धमायैकबन्धो–
रविदितमहिमैषा नन्दसूनोर्व्विशेषात्।
अयि ! सहचरि ! दूरोन्मुक्तमायासहाया
वद कथमनुकम्पादृष्टिसम्पातमेतु ॥ २११ ॥

सन्देहानन्तरं जायमान ऊहो वितर्कः। यथा—

यदि नाम जहौ जहौ यसा (?) यमुनाकूलमिदं स कालियः।
अयि ! केन तदा तदाहितो विषजालज्वलनोऽनुसर्प्पति ॥ २१२ ॥

शृङ्गारे हासोऽपि व्यभिचारी। तदुक्तं साहित्यदर्प्पणे—

"रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः।

---

१. B reads प्रियो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ॥
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेयं स्वयं भावितबुद्धिभिः ॥"[1]इति ।

"हासभयशोकोत्साहविस्मया अपि श्रृङ्गारे व्यभिचारिण"[2]इति भानुदत्त-मिश्राः । वस्तुतो जुगुप्सातिरिक्तास्सर्व्वे एव स्थायिभावाः श्रृङ्गारे व्यभिचारिण इति प्रतिभाति । इत्थं निरूपितः साङ्गः श्रृङ्गारः ।

अथ श्रृङ्गाराभासो निरूप्यते । विभावादिव्यज्यमानानौचित्यविशिष्टा रतिः श्रृङ्गाराभासः । तदुक्तं—"तदाभासा अनौचित्यप्रवर्तिता"[3] इति । अनौचित्यं च रतेः साहित्यदर्प्पणे स्फुटम्—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते ।
श्रृङ्गारेऽनौचित्यमि.................. ॥ति ।

तत्र रतेरनुभयनिष्ठत्वे श्रृङ्गाराभासो यथा—

नो कदापि सरसं समीक्षिता नापि सस्मितगिराऽनुभाषिता ॥
हन्त ! सन्ततमिदं तथापि मे नन्दनन्दनमुपैति मानसम् ॥ २१३ ॥

एवमन्येऽपि श्रृङ्गाराभासाः स्वधीभिरुदाहरणीया इति संक्षेपः ।

श्रृङ्गारसारिणी नूनमपि दोषगणाविला ।
सतां सदयबुद्धीनां मानसं मोदयिष्यति ॥ २१४ ॥

इति श्रीमहामहोपाध्यायचित्रधरविरचिता श्रृङ्गारसारिणी समाप्ता ।

---

१. *op. cit.*—III—199-200 (pp. 229-231,)

२. Compare—स्थयिनोऽपि व्यभिचरन्ति । हासः श्रृङ्गारे...भयशोकौ करुणश्रृङ्गारयोः । उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणौ ।—*Rasa-taraṅgiṇī*—p. 55

३. *Kāvyaprakāśa*—p. 121.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

An alphabetical index of verses found in the *Śṛṅgārasāriṇī*

(Figures in the margin refer to pages)

अतनुघन–	२८	आलि स्मेरानन–	७
अतिमधुरवचः	२३	आलीभिर्व्विविधानवद्य–	२३
अद्योमात्रत–	४६	आलोक्यापरवल्लभा	३६
अधिमधु मधुरं	४५	उद्यत्तन्द्रावलितनयना	३३
अधिमधुरं कृतकृत्यः	४८	उपगतमभिलाषिणं	३०
अधिविपिनमियं	३०	उपयमनविधान–	२७
अन्यालक्तक–	५७	उपहासकथा	४०
अन्योन्यानृजुवीक्षणैः	९	एकत्र श्रवणे	६०
अन्योन्यालयकैतवागम–	९	एकस्याः सुमनोविनोदन–	५२
अपूर्वा रुचिरेतस्या	६८	एकेन प्रियसाक्षिणा	२१
अम्भोलीला–	५	एतत्कञ्चुकमङ्गुरीयक–	२६
असौ दूराद्दृष्टेः	१७	एतस्याश्चित्तकूपे	५
असौ दैवाद्दृष्टेः	१८	एताः खञ्जनगव्व	५१
असौ स्पृष्टा	१८	एताः शर्म्मद–	२९
असंशयं सा	६७	एतास्तिस्र उदार–	५२
अस्पृष्टेव	७	एनामेणदृशं	१८
आगन्तव्यमनेक–	४२	क उत्तमवसुव्ययो	३१
आगन्ताद्य	४६	कथारम्भे पत्युः	५८
आगन्तुं समयं	४७	कपोले पुलकोल्लासि	६०
आदातुं प्रविसारित	२६	कर्प्पूरद्रव–	४७
आर्य्ये निरागसि	२९	कर्प्पूरादपि	४५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्प्पूरैस्तिलकावलीं ३८
कलिन्दतनयातटे ६०-६१
कस्माद्विनैव ४५
काञ्ची वक्षसि ५८-५९
कान्तश्चाटुपटुः ४०
कान्तालयाद्गतवतीं ३३
कान्ते कलावति ३०
कान्ते केलिकला- २८
कान्तेनाद्य ६३
कान्तो वाचि ४८
कितव कुरुकथाभिः २५, २६
किन्ते वक्षसि ६०
किन्नो पश्यसि ७
किमालपामि प्रकटं ३३
किमिदमनुनय- २६
कुञ्जे क्वापि ५७
कुमारीणां रत्नं ४
कूले मोदानुकूले १
कृतमन्यगवेषणेन ६४
कृत्वाऽसौ समयं ४२
कोऽयं श्वेतभुजङ्ग- १४
क्रमेण रसलीलया ६९
क्रीडन्त्येकजनेन २९
क्षणं वितनुते ५८
क्षोणीपालकुलावतंस १७
खलोक्तिऽप्रत्यक्ता ११
खेदावेशवशा ११
गतवति गृहमध्या- २४, ६६
गतवति समयं २५
गम्भीरः क्षमयायुतः ५०
गर्ज्ज जलदहत १७
गाढालोकनवाक् ३५
गायन्ती स्वरसञ्चित- ३१
गुरुजनगुरुयन्त्रिता ३३
घनीभूता भूषावलि- ३७-३८
चक्षुःपद्मतया २२
चक्षुर्युगेन ५६
चक्षुश्चञ्चलता ३५
चित्रं चित्रं सहचरि ६
जगज्जलधितारकः १
तनोरुद्यन्त्यस्याः १९
तन्वि भ्रूयुग- ३५
तवालिकेऽलक्तक- ३६
त्यक्ता हासकथा १०
त्वत्प्रेमैकवश- ११
त्वामाकल्प्य हृदा १३-१४
दधाति नलिनी- ५९
दयितप्रहितस्वस्ति- ६४
दरमुद्रित- १७
दष्टेऽधरपुटे ५८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृष्टविस्खलित ६६
दृष्ट्वा कौस्तुभ— २५-२६, ६४
धन्या भवेत् ३२
धन्यास्ता अरविन्द— ३३
न प्रिया मुररिपोर्मम ६९
न वेणीविन्यासो ५६
नाधीना प्रतिवेशिनी ७
नानादेशकथा ५३
नायातो दयितो ४८
नायातः समयं ४७
नाहं भानुमति ५१
निजभवनपतिः २७, ६८
निधाय मणि— ३१
निधाय मृदु— ६३
निमीलितविलोचना ६४
निर्गत्य नाभिगृहतः ३०, ६७
निस्पन्दा क्षणमास— ५५
नीलाम्भोदं वियति ६-७, ६७
नो कदापि सरसं ७०
पत्रं वीक्ष्य पटीर— ३२, ६५
परागपरिपिञ्जरं ६१
परालापात्कोपः ३१
पाटीरद्रवलेप ५०
पाणिं मुञ्च ५१
पाण्डुर्गण्डतटी ४४-४५
पादाग्रे प्रपतन् ५२
पादान्तप्रणते ११
पांशुक्रीडे सरभस— २३
प्रकोपात्पञ्चेषुः ५७
प्रत्यङ्गसङ्गि— ३८
प्रयत्नशतसम्भृतं ५९
प्रविततगुण— ६९
प्रातर्गेहागतवति ६९
प्राप्ते सागसि सा २५
प्रेमाणं परिभाव्य ४५
प्रेयानन्यपराङ्मुख— ४१
प्रेयान् शीलपयोनिधिः ४०
प्रोद्यत्केलिमनोरथैः ४१
प्रोद्यत्प्रज्ञपदार्प्पणे २
बन्धूकोचित— १९
भित्तौ लग्ना ८, ६३
भूयो भूयः श्रवण— ९
भूयः शीतमयूख— ५४
भूयः सम्प्रति २८
मध्ये सखीजन— ४०
मालां जाति— २६
मुक्ता काञ्चन— ३६
मुक्तां ग्राहयितुं ४०-४१
मुग्धाक्षि क्षमया १०
मूकीकृत्य विभूषणानि ३९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद् वृद्धयै	३६-३७	वेशं विधाय	३७, ६८
यदि नाम	६९	शक्ता गन्तुं	८, ६७
यस्याः प्रोल्लसदङ्ग–	५०	शय्यायां परिवृत्य	५२-५३
यातायामनुराग–	३९	शय्यां सज्जयति	४६
यातायाः कमनीयकेलि–	४१	शय्यां सज्जयितुं	४६
या पूर्वं विनिवेशितैव	२३	शून्यं केलिगृहं	२२, ६८
यामि प्रेयसि मुञ्च	१३	शृङ्गारसारिणी नून–	७०
यास्यामि नालि	२९	शृङ्गारैकरसप्रसार–	१
योऽसौ जातु	३५	श्वश्रूः पार्श्वविवर्तने	४८
रचयसि वरपत्रं	३८	सखि रोधसि यामुने	६
रचितां नवमालिका–	५७-५८	सखीभिः स्निग्धाभिः	३७
रसं समर्प्पयत्येषा	१	सखीभ्यः श्रीकृष्णं	५
राजद्विलास–	३२	सञ्जाते समयात्यये	१६
राजन्तां वहिरेव	५१-५२	सत्कारालयरोहिणी–	१३
वयसा कमनीयकेन	५६	सदेकमलयाचलः	१
वक्षोऽनुलक्ष्य परमुग्ध–	३६	सन्तप्तो विरह–	५३
वक्षःस्थलं कितव	३७	सन्ति स्मेर–	५२
वक्त्रं वीक्षितुमञ्चित–	२२	सप्रेमानुनयं	१२
वितर चारु	६३	समायातं प्राणप्रियमत–	५७
विधाय मणिनूपुरे	५९	समीपे कलिन्द्याः	६६
विरम भृशमनल्पा	६८	समुत्सुक–	६५
विष्वक् संवीक्ष्यमाणः	५	समुल्लसित	६०
वीणां सादरमानिधाय	१८	सम्यक् प्रपीत–	३९
वृन्दारण्यसमीरधीर	८, ६७	सरभसमनु–	५६
वेपते पतति भूतले	६४	सरस्वानेतस्याः	५६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सश्लाघे मयि	५१	स्फुटमालिखितो	५
सुप्ताया दयितान्तिके	१३	स्मितोद्भेदभ्राज–	२५
सुवर्णमणि–	५९	हठादेवाश्लिष्य	१७-१८
स्तुवत्येकामन्यां	५०	हरिणा हरिणा	५८
स्फीतासीमगुण–	१६	हरिपरिचयहेतो–	३२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

An alphabetical list of books and authors cited or referred to by Citradhara in his *Śṛṅgārasāriṇī*

(Figures in the margin refer to pages)

अलसमोदिनी ५३

कादम्बरी १५

काव्यप्रकाश २

गङ्गानन्दकवीन्द्र २७

जगन्नाथपण्डित ३,२०,२१,२७, ६२,६५,६६

तातचरण १७

भानुदत्त १९,२०,७०

भोजराज ४

मम्मट १५

महाराज (भोज) १६,१९,३०, ४३,४४

रत्नाकर २१

रसतरङ्गिणी ६२

श्रुति ३

साहित्यदर्पण ६,८,९,१०,१२, १४,१५,२४,४८, ४९,५५,६२,६३, ६५,६९,७०

साहित्यदर्पणकार १९,२२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi